सीता । हा देव्व ! एसो मये विणा अहं वि एदेण विणा त्ति सिविणेवि केण सम्भाविदं आसी । ता मुहुत्तअं वि जम्मान्तरादो विअ अणुलद्धदंसणा वाहसलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तं । इति पश्यति । [फ]

तम । सर्वं हासं परित्यज्य ।

विलुलितमतिपूरैर्वाष्पमानन्दशोक-
प्रभवमवसृजन्ती तृष्णयोत्तानदीर्घा ।

(फ) हा देव ! एष मया विना अहमपि एतेन विनेति स्वप्नेऽपि केन सम्भावित-मासीत् । तन्मुहूर्त्तकमपि जन्मान्तरादिव अनुलब्धदर्शना वाष्पसलिलान्तरेषु प्रेक्षे तावत् वत्सलमार्य्यपुत्रम् ।

मिति यावत् । पश्यन्ती भूयाः पुनरपि समागमेन चिरमेव पतिं पश्येत्याशीर्वादः ।

(फ) सीतेति । एष आर्य्यपुत्रो मया विना तिष्ठतु, अहमपि एतेन आर्य्य-पुत्रेण विना तिष्ठामीत्यर्थः इति केन जनेन स्वप्नेऽपि सम्भावितं चिन्तितमासीत् अपितु केनापि नेत्यर्थः आवयोर्विरहः सर्वथैवासम्भव आसीदिति भावः । तत्तस्मात् विरहेण चिरदर्शनाभावदित्यर्थः, मुहूर्त्तकमपि अत्यल्पकालमपि बहुसमयं यावत् दर्शनासम्भवादित्यपेरर्थः, जन्मान्तरादिव अन्यस्मात् जन्मन इव अनुलब्धं प्राप्तं दर्शनं रामदर्शनं यया सा अहं वाष्पसलिलान्तरेषु अश्रुजलस्य पतनोद्गमयोरवकाशेषु । वत्सलं मां प्रति स्नेहशालिनम् । इदानीमार्य्यपुत्रदर्शनमावश्यैव महासुखकरत्वादिति भावः ।

विलुलितेति । तत्कालीनमिलनजनित आनन्दः दीर्घकालविरहजनितश्च शोकः तौ प्रभवौ हेतू यस्य तं तथोक्तं अतिपूरैः अतिस्थूलधाराभिः विलुलितं विगलितं वाष्पं अश्रुजलं आ सृजन्ती परित्यजन्ती, तृष्णया अव्यक्तदर्शनेच्छया उत्ताना स्फीता दीर्घाच सा, तथा स्नेहनिस्यन्दिनी प्रणयातिशयव्यञ्जिकेति यावत् धवला कज्जललेपाभावेन

स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहलमुग्धा दुग्धकुल्येव दृष्टिः॥ २३॥

वास। ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्राया: प्रवान्तु वनानिलाः।

नितान्तनिर्मलत्वेन च श्वेतकान्तिः अतएव बहलमुग्धा स्थिरमनोहरा अत्यन्तसुन्दरीति यावत्, अतएव दुग्धकुल्या कृत्रिमा दुग्धनदीव प्रकाशमाना ते तव दृष्टिः चक्षुः हृदयेशं प्राणनाथं रामं स्नपयति अभिषिञ्चति, निर्निमेषा अविरतमेव सर्वाङ्गं पश्यतीत्यर्थः।

अत्र कार्य्येण दृष्टौ, पुरुषस्य स्नानं कारयन्त्याः कस्याश्चित् स्त्रियाः व्यवहार-समारोपात् समासोक्तिरलङ्कारः, तथा दुग्धकुल्येवेत्यत्र उपमा, सादृश्यन्तु उभयोः श्वेतांशे, पदार्थहेतुकं काव्यलिङ्गञ्च एतेषामङ्गाङ्गिभावेन सङ्करः। तथा स्नप स्ने हेति मुग्धादुग्धेति च व्यञ्जनसंघस्य सकृत् साम्यात् छेकानुप्रासश्च तेन सह संसृष्टिः।

"बहलः।···दृढे ति" शब्दकल्पद्रुमः। "कुल्याल्पा कृत्रिमा सरिदि" त्यमरः।

प्रभवत्यस्मादिति प्रभवः अपादाने अल्।

मालिनी वृत्तम्॥ २३॥

ददत्विति। मधुश्च्युतः मधु श्चोतन्ति क्षरन्तीति मधुश्च्युतः मधुस्राविणः तरवो वृक्षाः पुष्पैः फलैश्च अर्घ्यं ददतु रामायेति शेषः। स्फुटितानां विकसितानां कमलानां पद्मानां आमोदप्रायः सुगन्धबाहुल्यं येषु ते तथोक्ताः वनानिलाः वनवायवः प्रवान्तु प्रवहन्तु रामशरीरसेवनायेत्यर्थः। रतये सुरताय उत्कण्ठा औत्सुक्यं येषां ते, तदानीं पक्षिणामतीवस्वरमाधुर्य्यं स्यादिति बोध्यं शकुन्तयः पक्षिणः अविरलं अनवरतं कलं मधुरास्फुटं यथास्यात्तथा क्वणन्तु शब्दायन्तां श्रुतिसुखजननायेत्यर्थः। कथमयमादेश इत्याह यतोऽयं देवो रामः स्वयं आत्मना ननु प्रतिनिधिनेत्यर्थः पुनर्द्वितीयवारं इदं वनमागतः। एतत् सर्वं रामस्य सत्कारार्थमाचरणीयमिति भावः।

कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः

पुनरिदमयं देवी रामः स्वयं वनमागतः ॥२४॥

रामः । एहि सखि ! वासन्ति ! नन्वितः स्थीयताम् । [व]

वास । उपविश्य सास्रम् । महाराज ! अपि कुशलं कुमारलक्ष्मणस्य ? । [भ]

रामः । अश्रुतिमभिनीय । [म]

अत्र अर्घ्यदानादीन् प्रति चतुर्थचरणगतवाक्यार्थं रामागमनस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । यथा कश्चित् राजा स्वकीयराजधान्यामन्यस्मिन् राजनि समागते तत्सम्मानार्थं नार्थं अर्घ्यादिपूजाद्रव्यचामरव्यजनवातवैतालिकस्तुतिपाठानादिशति, तद्वदियमपि वनाधिदेवता वासन्ती स्वाधिकृतवने समुपस्थितस्य रामस्य सम्मानार्थं नार्थं अर्घ्यदानाय तरून्, व्यजनाय वनानिलान्, स्तुतिसुखाय च विहङ्गानादिदेशेति वस्तु व्यज्यत इति शब्दशक्तिमूलो वस्तुध्वनिः ।

"आमोदः सोऽतिनिर्हारी"। "प्रायोभूम्यन्तगमने"। "ध्वनौ तु मधुरास्फुटे कलः"। "शकुन्ति-पक्षि-शकुनि-शकुन्त-शकुन-द्विजाः" इति चामरः ।

हरिणी वृत्तम् ॥ २४ ॥

(व) राम इति । अनुनये ननुशब्दः । इतः अस्मिन् स्थाने । आङ्गुलीनिर्देशपुरःसरेयमुक्तिः ।

(भ) वासेति । अपिशब्दः प्रश्ने । रामस्य दृश्यमानत्वात् सीतायाश्च निर्वासनश्रवणेन मरणनिश्चयात् परिचितानां सीतारामलक्ष्मणानां मध्ये केवलमनुपस्थितस्य लक्ष्मणस्यैव कुशलप्रश्नः कृत इति बोध्यम् ।

(म) राम इति । अश्रुतिं उक्तवासन्तीवाक्यश्रवणाभावं प्रगाढचिन्ताभिनयेनेत्यर्थः ।

करेति । मैथिली सीता करकमलेन पाणिपद्मेन वितीर्णैः दत्तैः अम्बुनीवारशष्पैः जलनीवारधान्य (तोनिधान्य इति हिन्दीभाषा उड़ीधान्य इति वङ्गभाषा) बालतृणैः

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान् मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः ॥ २५ ॥

वास। महाराज! ननु पृच्छामि, अपि कुशलं कुमार-लक्ष्मणस्य?। [य]

रामः। स्वगतम्। अये महाराजेति निष्प्रणयमामन्त्रणपदं, सौमित्रिमात्रे च वाष्पस्खलिताक्षरः कुशलप्रश्नः, तथा मन्ये

यान् तरुशकुनिकुरङ्गान् वृक्षपक्षिहरिणान् जलैर्वारान्, नीवारैः पक्षिणः, बालतृणैः हरिणानित्यर्थः अपुष्यत् पालितवती। तेषु तरुशकुनिकुरङ्गेषु दृष्टेषु मयेत्यर्थः सत्सु प्रस्तरस्य पाषाणस्य उद्भेदे विदारणे योग्यः समर्थः द्रव इव वज्रादिवेग इव हृदयस्य मनसः कोपि अनिर्वचनीयः विकारः शोकजनितविकृतिर्भवति। सीतया परिपोषितान् तरुविहङ्गकुरङ्गान् क्रमशो दृष्ट्वा सीताशोकातुरो रामः तस्याश्चिन्तया वासन्तीवाक्यं न श्रुतवानिति बोध्यम्।

अत्र यथासंख्योपमालङ्कारयोरङ्गाङ्गिभावेन सङ्करः।

"तृणधान्यानि नीवाराः।" "शष्पं बालतृण"मिति चामरः।

"द्रवः। वेग" इति शब्दकल्पद्रुमः।

मालिनी वृत्तम् ॥ २५ ॥

(य) वासेति। पूर्वमुक्तं वाक्यं रामेण न श्रुतमित्यालोच्य 'ननु पृच्छामी' त्युच्चारणेन रामं सावधानीकृत्य पुनः पृच्छति अपीति।

(र) राम इति। अत्र अयी इतिः विषादसूचकमात्मसम्बोधनम्। महाराजेति महाराजेत्यानुपूर्वीकं निष्प्रणयं स्नेहासूचकम् आमन्त्रणपदं सम्बोधनशब्दः। महाराजेति साधारणप्रयोक्तव्यशब्दे सखिशब्दादिवत् प्रणयवत् सम्बन्धविशेषद्योतनाभावात् प्रणयाभाव

विदितसीतावृत्तान्तेयमिति। प्रकाशम्। आं, कुशलं कुमारस्य। इति रोदिति। (र)

वास। अयि देव! किमिति दारुणो दारुणः खल्वसि?। [ल]

सीता। सहि! वासन्दि! किं तुमं सि एव्वं वादिणी, पिआरहो क्खु सव्वस्स अज्जउत्तो, विसेसदो मम पिअसहीए। [व]

वास। त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।

(व) सखि! वासन्ति! किं त्वमसि एवं वादिनी, प्रियार्हः खलु सर्वस्यार्य्यपुत्रः, विशेषतो मम प्रियसख्याः।

इति भावः। सौमित्रिसाम्ये केवललक्ष्मणे केवललक्ष्मणविषय इत्यर्थः। वाष्पेण वाष्पावरुद्ध कण्ठतयेत्यर्थः। स्खलितानि अस्पष्टोच्चारितानि अक्षराणि वर्णा यस्मिन् स यथोक्तः कुशलप्रश्नः मङ्गलजिज्ञासा।

तथा तेन हेतुना इयं वासन्ती, विदितोऽवगतः सीताया वृत्तान्तो निर्वासनेन मरणं यया सा इति मन्ये निश्चिनोमि। प्राणवत् प्रियसख्याः सीताया निर्वासनेन अतीवविरुद्धाचरणात् सीताघटितोऽनया सह मम प्रणयो नष्टः, सुतरां निष्प्रणयमामन्त्रणपदं, सीतायामरणनिश्चयेन तेन च विदितसीतावृत्तान्ता वासन्तीति निश्चयः; अन्यथा सीताया अपि कुशलं पृच्छेदिति भावः। आमिति स्वीकारार्थमव्ययम्। आमिति संस्कृताव्ययशब्दस्य 'ह्याँ' इति वङ्गभाषाप्रसिद्धः प्रकृतानुरूपः शब्दः।

(ल) वासेति। दारुणो दारुणः अतिभयङ्करः अतिशयार्थे द्विर्वचनम्।

(व) सीतेति। एवं वादिनी आर्य्यपुत्रं प्रति रूक्षभाषिणी किं कथमसि, नैतदुचितमिति भावः। कथमित्याह प्रियार्हः प्रियवाक्येनालापयोग्यः। मम प्रियसख्याः विशेषतः प्रियार्हः इत्यर्थः। तेन नैवं ब्रूहीति भावः।

इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव, शान्तमथवा किमिहोत्तरेण ॥२६॥

इति मूर्च्छति

रामस्यातिदारुणत्वं प्रति हेतुमाह त्वमिति। त्वं मे मम जीवितं जीवनमसि तद्वत् प्रियतमत्वादिति भावः, तथा त्वं मे द्वितीयं हृदयं असि ममालोच्यसर्वविषयाणामेव,वगमादिति भावः, तथा त्वं मे नयनयोश्चक्षुषोः कौमुदी ज्योत्स्ना असि तद्वदानन्दजनकत्वादिति भावः, तथा त्वं मे अङ्गे वक्षःप्रभृत्यवयवे अमृतं सुधा असि तद्वत् स्निग्धत्वस्य स्पर्शसुखस्य च जनकत्वादिति भावः। इत्यादिभिः एवं भूतैरन्यैश्च प्रियशतैः प्रियाणां प्रियवचनानां शतं प्रियाचरणानामिति भावः शतैर्बाहुल्यैः मुग्धां सरलबुद्धिशालिनीं सा यदि तीक्ष्णबुद्धिशालिन्यभविष्यत् तदा तां प्रति ईदृशं दुर्व्यवहारं कर्त्तुं कदापि न भवानशक्ष्यत्, येन सा प्राक् तदवगम्य प्रतिकारोपायमवलम्बेतेति भावः। अनुरुध्य सन्तोष्य तामेव नितान्तविश्वासकारिणीं त्वदेकतानचित्तामित्यर्थः न तु विरुद्धाचरणेन विप्रियामितीवशब्दार्थः निर्वासितवानिति शेषः। ईदृशमिदं वृत्तान्तस्य अस्य कार्य्ययुक्तायुक्तत्वप्रदर्शनेन दयोत्पादनाभिप्रायः "पाषाणे नास्ति कर्दमः" इति न्यायेन निष्फल एवेति विवेच्याह अथवेति। अथवा किम्वा शान्तं विरतं मम वाक्यमत्रैव समाप्तं भवत्वित्यर्थः। कथमित्याह किमिति। इह तव सन्निधाने उत्तरेण एतत् परवर्त्तिना वाक्येन किं फलं अपितु किमपि नास्तीत्यर्थः अतीतघटनायाः पुनर्निवर्त्तनासम्भवात् सीतानिर्वासनकार्य्यस्य युक्तायुक्तत्वप्रदर्शनवाक्यमिदानीं निष्फलमेवेति भावः।

अत्र "मुखं तव कुरङ्गाक्षि! सरोजमिति नान्यथा" इत्यादिवत् समासाभावेऽपि त्वं जीवितमित्यत्र, त्वं कौमुदीनयनयोरित्यत्र, अमृतं त्वमङ्गे इत्यत्र च निरङ्गं केवलरूपकत्रयं, तथा "मुखं द्वितीयचन्द्र" इत्यादिवत् त्वमसि मे हृदयं द्वितीयमित्यत्र एकस्य द्वितीयहृदयासम्बन्धेऽपि तत् सम्बन्धोक्त्या असम्बन्धे सम्बन्धरूपातिशयोक्तिः, तथा तामेव इत्यतः परवर्त्तिनो वक्तुमिष्टस्य 'निर्वासितवानिति'वाक्यांशस्य रामनिर्दयत्वप्रतिपत्तये निषेधाभासादाक्षेपालङ्कारः अर्थापत्तिर्व्वेत्येतेषां परस्परमङ्गाङ्गिभावेन सङ्करः। किन्तु चारुतरतरुणाः कारुत्वादिः दरिद्रोष इव प्रचुरालङ्कारभावादिभिर-

रामः । स्थाने खलु वाक्यनिवृत्तिर्मोहश्च । सखि ! समा-
श्वसिहि समाश्वसिहि । (अ)

वास । समाश्वस्य । तत् किमिदमकार्य्यमनुष्ठितं देवेन ? । (च)

सीता । सहि ! वासन्दि ! विरम विरम । (स)

रामः । लोको न मृष्यतीति । (छ)

वास । तत् कस्य हेतोः । (ज)

(स) सखि ! वासन्ति ! विरम विरम ।

उद्धृताया अस्याः कवितायाः पुनः पुनस्त्वंपदोपादानात् अनवीकृतत्वदोषः सहृदयाना-
मुद्वेगं जनयति ; स च

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे ।

इति पाठेन समाधेयः । एतत्पाठे वाग्बन्धः समुचितः ।

वसन्ततिलकावृत्तम् ॥ २६ ॥

(अ) राम इति । वाक्यनिवृत्तिः वासन्त्या वाक्यरोधः, मोहो मूर्च्छा च स्थाने
खलु युज्यत एवेत्यर्थः दारुणशोकोदयादिति भावः ।

"युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः ।

(च) वासेति । तत्किमित्येकमव्ययं प्रश्नबोधकम् । अकार्य्यं अप्रशस्तकार्य्यं
सीतानिर्वासनरूपं निन्दितकार्य्यमित्यर्थः । अनुष्ठितं कृतम् ।

(स) सीतेति । विरम कठोरवाक्यकथनादिति शेषः । अवधारणे द्विर्वचनम् ।

(छ) राम इति । लोको राज्यवासी जनः न मृष्यति सीताया रक्षोवस्थानं
न सहते प्रजाभिर्न सीताया रक्षोवस्थानमभिप्रेतं इति हेतोरस्या निर्वासनरूपमका-
र्य्यमनुष्ठितमित्यर्थः । एतेन प्रजावर्गं प्रति रामस्य महान् विरागो व्यज्यते ।

(ज) वासेति । तत् अमर्षणं, कस्य हेतोः, केन हेतुना सीताया रक्षो-
वस्थानं प्रजावर्गस्यानभिप्रेतमित्यर्थः । षष्ठी हेतुप्रयोगे ।

रामः। स एव जानाति किमपि। (क)

तम। उचितस्तदुपालम्भः। (ख)

वास। अयि कठोर! यशः किल ते प्रियं
किमयशो ननु घोरमतः परम्।

(क) राम इति। स एव लोक एव प्रजावर्ग एवेत्यर्थः किमपि सीताया गृहावस्थाने प्रत्यग्निशुद्धायाः अनिर्वचनीयकारणमित्यर्थः। येन कारणेन सीताया गृहावस्थानं प्रजानामनभिप्रेतं तत् कारणं मया अन्यैर्वा बुद्धिमद्भिर्जनैर्न ज्ञायते सुतरां तत् तुच्छं कारणमिति भावः।

(ख) तमिति। तस्य लोकस्य उपालम्भः दुर्वाक्यं 'दुर्जना यूयं सुतरां परमपतिव्रताया दोषमाविष्कुरुथेति कटुवाक्यमित्यर्थः' उचितः न्याय्य आसीदिति शेषः। नतु दुर्जनानामकारणाविष्कृतकलङ्कनिन्दावादेन सीताया निर्वासनमुचितमभूदिति भावः।

उपालम्भः। दुर्वाक्यमिति शब्दकल्पद्रुमः।

अयीति। अयि कठोर! निर्दयहृदय! ते तव यशः किल यश एव लोकानां गुणानुवाद एवेत्यर्थः प्रियं प्रीतिकरं, न तु पोष्यवर्गपरिपालनादिकं कथमन्यथा प्रधानपोष्यां प्रियभार्यां निर्वासितवानिति भावः। नन्वित्यनुनये। अतः प्रियतमभार्याया अकारणनिर्वासनोत्पन्नादयशसः परं प्रधानं घोरं भयङ्करं अयशः निन्दा किम् अस्ति अपि तु किमपि नेत्यर्थः। नन्वयशसः कारणं किमित्याह हे नाथ! हे वसुधाधिप! हरिण्या दृशौ नयने इव दृशौ यस्याः तस्याश्चञ्चललोचनायाः सीताया विपिने वने किंमभवत् का दशा अभवत्, तव विषये वयं मन्यसे किं चिन्तयसि त्वं चिन्तया किमवधारितवानित्यर्थः तत् कथय ब्रूहि। बत खेदे। असहायायाः सीताया निर्वासनेन मरणमेव निश्चित्य जगति सर्व एव त्वां निन्दिष्यन्तीति भावः।

अत्र यशोऽयशसोर्विरुद्धयोः संघटनया विषमालङ्कारः, तथा हरिणीदृश इति लुप्तोपमा चैतयोर्नैरपेक्ष्येण स्थितेः संसृष्टिः।

किमभवद्विपिने हरिणीदृशः

कथय नाथ! कथं वत मन्यसे ॥ २७ ॥

सीता। तुमं ज्जेव सहि! वासन्दि! दारुणा कठोरा अ, जा एव्वं विलपन्तो पदीवेसि। (ग)

राम। प्रणय एवेदं व्याहरति शोकश्च। (घ)

रामः। सखि! किमत्र मन्तव्यम्। (ङ)

त्रस्तैकहायनकुरङ्गविलोलदृष्टे-

स्तस्याः परिस्फुरितगर्भभरालसायाः।

(ग) त्वमेव सखि! वासन्ति! दारुणा कठोरा च, या एवं विलपन्ती प्रदीपयसि।

अमश इति असुरशब्दादिवत् विरोधार्थे नञ्। तथाचोक्तं—

"तत्‌साहश्यमभावश्च तदन्यत्वं तदल्पता।

अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः।"

द्रुतविलम्बितं वृत्तं, द्रुतविलम्बितमाह नभौ भरौ इति लक्षणात् ॥ २७ ॥

(ग) सीतेति। प्रदीपयसि आर्य्यपुत्रस्य मम च शोकाग्निमिति शेषः। दारुणा शोकोद्दीपनेन दुःखजनकत्वात्, कठोरा शोकातुरत्वदर्शनेनापि निर्द्दयत्वादिति भावः।

(घ) तमिति। प्रणयः त्वां प्रति वासन्त्याः स्नेहः, शोकः मरणनिश्चयजनिता त्वद्विषयिका अतीतस्मृतिः इदं रामं प्रति निन्दावाक्यं व्याहरति ब्रवीति, न तु स्वारसिकेच्छया वासन्ती ब्रवीतीत्यवशब्दार्थः। एकान्तप्रणयिनो जनस्य महाविपरिदर्शनेन शोकवह्निना जनः अवाच्यमपि वदति, अत एवात्र वासन्त्या दोषो नास्तीति भावः।

अत्र प्रणयाशङ्कयोर्व्याहारासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः।

(ङ) राम इति। अत्र सीताया अवस्थाविषये किं मन्तव्यं किं चिन्तनीयमस्ति अपि तु किमपि नेत्यर्थः। सर्वमेव मया निर्द्धारितमिति भावः।

ज्योत्स्नामयी च मृदुबालमृणालकल्पा (१)
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥ २८ ॥

सीता । अज्जउत्त ! धरामि एसा धरामि । (च)

(च) आर्य्यपुत्र ! ध्रिये एषा ध्रिये ।

किं निर्द्धारितमित्याह त्रस्तैकेति । त्रस्तो भीतः एकहायनः एकवत्सरवयस्कः यः कुरङ्गो हरिणस्तस्येव विलोले विशेषचञ्चले दृष्टी चक्षुषी यस्याः सा तथोक्ता तस्याः । हरिणस्य स्वभावचञ्चलमपि चक्षुः बाल्यकाले कुतश्चित् भयोत्पत्तौ अतिचञ्चलं भवति तत्तुल्यमतिचञ्चलं सीतायाश्चक्षुरिति द्योतनार्थं त्रस्तपदं हायनपदञ्च प्रयुक्तम् । परिस्फुरितस्य पूर्णतया सर्वदैव स्पन्दितस्य गर्भस्य भरेण भारेण अलसायाः मन्थरायाः प्रायेण चलितुमशक्तायाः इत्यर्थः तस्याः सीतायाः ज्योत्स्नामयी कौमुदीव श्वेतसुखस्पर्शा, मृदु कोमलं यत् बालमृणालं नवोत्पन्नमृणालं तत्कल्पा तत्तुल्यकोमलेत्यर्थः अङ्गं लतिकेव कृशा सा अङ्गलतिका क्रव्याद्भिः मांसभोजिभिः व्याघ्रादिहिंस्रजन्तुभिः नियतं निश्चितं विलुप्ता भक्षणेन नष्टा । इति मया निर्द्धारितमिति भावः ।

अत्र चतसृणां लुप्तोपमानामङ्गाङ्गिभावेन सङ्करालङ्कारः तथा मृदुबालमृणालेत्यत्र 'म्' इत्यस्य सकृत्साम्यात् छेकानुप्रासश्च । तथा मृदुबालमृणालकल्पा इत्यतः परं पठितुमुचितस्य चकारस्य प्राक् पाठात् अक्रमतादोषः, स च मृदुलबालमृणालवत् इति पाठेन समाधेयः ।

"क्रव्यात् । मांसाशिनि त्रि" इति शब्दकल्पद्रुमः ।

वसन्ततिलकावृत्तम् ॥ २८ ॥

(च) सीतेति । एषा अहं सीता, ध्रिये अवतिष्ठे ; इयमहमवस्थिता, न मृतेति भावः । रामं शोककातरमवलोकमानाया विषण्णोच्छ्वसितव्याकुलभावापन्नायाः सीताया उक्तिरियम् ।

---

(१) मृदुमुग्ध इति पाठान्तरम् ।

राम:। हा प्रिये! जानकि! क्वासि?। (छ)

सीता। हद्धी! हद्धी! अज्जउत्तोवि पमुक्तकण्ठं रोदिदि (१)। (ज)

तम। वत्से! साम्प्रतिकमेवैतत्, कर्त्तव्यानि दुःखितैर्दुःखनिर्वापणानि। यतः (झ)

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया।

(ज) हाधिक्! हाधिक्! आर्य्यपुत्रोऽपि प्रमुक्तकण्ठं रोदिति।

(छ) राम इति। क्वासि कुत्र गतासीत्यर्थः। उच्चैःस्वरं रोदनमिदम्।

(ज) सीतेति। प्रमुक्तः अनिरुद्धः यथाप्रसारं निर्गत इत्यर्थः कण्ठो ध्वनिर्यस्मिन् कर्म्मणि तद्यथा तथा प्रमुक्तकण्ठं उच्चैःस्वरमित्यर्थः। तरलस्वभावे जने का कथा, नितान्तगाम्भीर्य्यधैर्य्यसम्पन्नोऽपि आर्य्यपुत्रो यत् प्रमुक्तकण्ठं रोदिति, तदस्य भीषणः शोकवेगो जात इत्यत्र न संशय इति भावः।"

"कण्ठः। ध्वनि" रिति शब्दकल्पद्रुमः।

(झ) तमीति। एतत् प्रमुक्तकण्ठं रोदनं साम्प्रतिकमेव युक्तमेव रामस्येति शेषः। कथमित्याह, दुःखितैः जनैर्दुःखानि निर्वाप्यन्ते विनाश्यन्ते एभिरिति दुःखनिर्वापणानि दुःखविनाशोपाया इत्यर्थः, कर्त्तव्यानि अवश्यं विधेयानि। रोदनञ्च शोकदुःखप्रशमनोपाय इति भावः। रोदनस्य शोकदुःखलाघवकारणत्वं दृष्टान्तेन द्रढ़ीकृत्य समर्थयति यत इति। यतो यस्माद्धेतोः।

"युक्ते द्वे साम्प्रतं स्थाने"। इत्यमरः।

पूरोत्पीड इति। तडागस्य जलाशयविशेषस्य पूरेण वृष्टिवर्द्धितजलसमूहेन उत्पीडे सति अत्यन्तपीडायां तीरभङ्गादिना महानिष्टसम्भावनायां सत्यामित्यर्थः परीवाहः प्रणालीखननादिना जलनिःसारणं प्रतिक्रिया प्रतीकारः तीरभङ्गाद्यनिष्टनिवारणोपाय

---

(१) रुदी इति पाठभेदः।

शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते ॥२८॥

विशेषतो रामभद्रस्य बहुतरप्रकारकष्टो जीवलोकः । (क)

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा

प्रियाशोको जीवं कुसुममिव घर्म्मः क्लमयति (१) ।

इत्यर्थः : शोकक्षोभे सति शोकेन उद्वेलितावस्थायां प्रलापैरेव नानाविधानर्थकोक्तिपूर्वकारी-दनैरेवेत्यर्थः : नलन्दैरुपायैरित्येवशब्दार्थः : हृदयं मनः धार्य्यते रक्ष्यते स्थिरीक्रियत इत्यर्थः । यथा जलाशयस्य जलवृद्धौ सत्यां तन्निःसारणेन तस्य रक्षा, तथा शोकक्षोभे इति रोदनेन वाष्पनिःसरणात् मनसः स्थिरता इत्यर्थः । तस्मात् सीताशोकार्त्तस्य रामस्य प्रमुक्तकण्ठं रोदनं युक्तमेवेति भावः ।

अत एव प्रतिबिम्बवादेव दृष्टान्तालङ्कारः । कूपादीनां जलवृद्धावपि क्षुद्रत्वेन तादृशगुरुतरानिष्टसम्भावनाऽभावात् वृहज्जलाशयस्यैव तड़ागादेः तीरभङ्गेन गुरुतरा-निष्टसम्भावना स्यात् तन्निवारणार्थमेव परीवाह इति दर्शयितुं तड़ागपदमुपात्तं तेन न अविशेषे विशेषाख्यदोष इति दिक् ।

तड़ागमाह गव्यवर्द्धमानभूतं वशिष्ठवचनम्—

चतुर्दिक्षु पञ्चचत्वारिंशद्धस्तान्यूनतायां सहस्रवितयहस्तान्यूनत्वेन तड़ागः ॥२९॥

(क) विशेषत इति । बहुतरप्रकारं विविधं कष्टं यत्र सः, जीवलोकः संसारः । ततोपि रामस्य प्रमुक्तकण्ठं रोदनमुचितमिति भावः ।

रामसम्बन्धि जीवलोकस्य बहुतरप्रकारकष्टत्वं प्रतिपादयति इदमिति । अभियुक्तेन मनसा सततसावधानेन चेतसा अन्यथा नाना विशृङ्खला स्यादिति भावः । इदं विश्वं जगत् विधिवत् यथाविधानं शास्त्रविधानानुसारेणेति यावत् पाल्यं रक्षणीयं । इदं राज्य-रक्षणमेकं कष्टमिति भावः । तथा घर्म्म आतपः कुसुममिव प्रियाशोकः सीताविरहशोकः जीवं जीवनं क्लमयति अवसादयति । इदं ततोऽपि महत् कष्टमिति भावः । ननु विलापेन तच्छोकजावधनं क्रियतामित्याह स्वयमिति । स्वकमात्मनैव त्यागं सीताया निर्वासनं

(१) स्नपयतीति पाठान्तरम् ।

स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो ननु लाभो हि रुदितम् ॥ ३० ॥

रामः । कष्टं भोः ! कष्टम् । (ट)

दलति हृदयं गाढोद्वेगी द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।

कृत्वा रामेण विलपनेन विलापेन विनोदः शोकापनोदनं सीताशोकलाघवकरणमिति यावत् असुलभः आयासलभ्यः कष्टसाध्य इत्यर्थः । त्यागस्य स्वकृतिसाध्यत्वं न यदि त्यागं नाकरिष्यत् तर्हि शोक एव नाभविष्यत्, अथ त्यागः कृतः, इदानीं तदर्थं विलापः निजापरिणामदर्शित्वप्रकाशेन लोकसमाजे परिहासायैव स्यादिति । इदन्तु ततोपि महत् कष्टमिति भावः । निर्जनस्थाने तु विलापः सम्भवत्येव इति ज्ञापनाय न भवेदित्यनुक्त्वा असुलभः इत्युक्तं । तत्स्थादन्यत्र शोकप्रकाशावसराभावादित्यर्थः । अद्य अस्मिन् समये अस्माकं समीपे इत्यर्थः उच्छ्वासः शोकप्रकाशः शोकप्रकाशरूपमित्यर्थः रुदितं रोदनं लाभो हि लाभ एव भवति रामस्येति शेषः । अपिशब्दः सम्भावनायां इत्यहं सम्भावयामीत्यर्थः । नन्विति सीतासम्बोधने । उपहासभयेन लोकसमाजे विलापासम्भवादत्र कृतो विलापो रामेण लाभ इव विवेच्यत इति सम्भावयामीति भावः ।

अत्र कष्टकार्य्यं प्रति बहुकारणानामुक्तत्वात् समुच्चयालङ्कारः, तथा द्वितीयचरणे उपमा, तथा चतुर्थचरणे रोदने आरोप्यमाणस्य लाभत्वस्य प्रकृतशोकापनोदनोपयोगितया परिणामश्चेत्येतेषामङ्गाङ्गिभावेन सङ्करः । असुलभ इत्यत्र प्रधानस्य नञर्थस्य समासे गुणीभावात् विधेयाविमर्शदोषः, स तु विलपनविनोदोऽपि नहि वां इति पाठेन समाधेयः ।

घर्म्मः । आतप इति शब्दकल्पद्रुमः ।

शिखरिणी वृत्तम् ॥३०॥

(ट) राम इति । कष्टं दुःखं अतिशये द्विरुक्तिः । महत् कष्टमिदानीमनुभवामीत्यर्थः । भो इति वासन्तीसम्बोधने ।

ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥२१॥

तदेव महत् कष्टं प्रतिपादयति दलतीति। गाढ़ो दृढ़चिरस्थायीति यावत् उद्वेगः सीताशोकावेगः हृदयं दलति आमर्दयति, तु किन्तु द्विधा न भिद्यते विदार्य्यते द्विखण्डीक्रियते इति यावत् न विनाश्यत इत्यर्थः तेनोद्वेगेनेति शेषः। यदि हृदयं विदीर्णमभविष्यत् तदा नेदृशं दुःखमभविष्यदिति भावः। विकलः शोकविह्वलः कायो देहः मोहं मूर्च्छां वहति भजते काचित्कमचैतन्यं भजत इत्यर्थः, किन्तु चेतनां चैतन्यं न मुञ्चति चिराय न परित्यजतीत्यर्थः। तथात्वेऽपि चेदृशदुःखानुभवो न स्यादिति भावः। तथा अन्तर्दाहः अन्तःकरणशोकसन्तापः तनूं शरीरं ज्वलयति सन्तापयति किन्तु भस्मसात् भस्मने सम्पाद्यमानां भस्मीभूतामित्यर्थः न करोति। तथा सत्यपि शोकाग्नेरुपशमो भवेदिति भावः। तथा मर्म्मच्छेदी हृदयविदारी विधिः दैवं प्रहरति ताड़यति, किन्तु जीवितं जीवनं न कृन्तति न छिनत्ति न विनाशयतीत्यर्थः। एवमपि दुःखनिवारणं स्यादिति भावः। सर्वविधसुखलेशहीनस्य नानाविधदारुणदुःखशोकनिपीड़ितस्य ममेदानीं मरणमेव सर्वथा श्रेय इति सर्वत्र भावः।

अत्र हृदयामर्द्दनरूपकारणे सत्यपि द्विधाभेदरूपफलाभावात्, मूर्च्छाप्राप्तिरूपहेतौ विद्यमानेऽपि चैतन्यत्यागरूपकार्य्याभावात्, देहज्वलनकारणे वर्त्तमानेऽपि भस्मरूपतत्फलाभावात्, प्रहाररूपकारणे सत्यपि जीवनविनाशरूपफलाभावाच्च चत्वारो विशेषोक्त्यलङ्काराः, तेषाञ्च परस्परनैरपेक्ष्यस्थितेः संसृष्टिः। बहुतरकर्त्तृवाच्यप्रत्ययान्तक्रियामध्ये एकस्याभिद्यत इति कर्म्मवाच्यप्रत्ययान्तक्रियाया निर्द्देशात् प्रक्रमभङ्गदोषः, स च करीति नतु द्विधा इति पाठेन समाधेयः। तुशब्दानुषङ्गात् न न्यूनपदत्वदोष इति भाव्यम्।

उद्वेगो विरहजन्यदुःखमिति रसमञ्जरी। विकलः। विह्वलः इति शब्दकल्पद्रुमः। स्त्रिया मूर्त्तिस्तनुस्तनूः। विधिर्विधाने दैवे च इति चामरः।

सीता । एवमेदम् । (ठ)

रामः । हे भवन्तः ! पौरजानपदाः ! । (ड)

न किल भवतां स्थानं देव्या गृहेऽभिमतं तत-

स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता ।

(ठ) एवमिदम् ।

हरिणी वृत्तम् ॥२१॥

(ठ) सीतेति । इदं वदतीत्यादिना त्वयोक्तं एवं सत्यमित्यर्थः । अहमपि त्वयोक्तां सर्वामवस्थामनुभवन्ती सर्वमेव सत्यतया विश्वसिमीति भावः ।

(ड) राम इति । उन्मुक्तवैराग्यसूचनाय प्रजावर्गं प्रति भवच्छब्दप्रयोगः ।

न किलेति । देव्याः सीताया गृहे स्थानमवस्थितिः भवतां न अभिमतं भवद्भि-र्नाभिप्रेतं आसीदिति शेषः; अन्यथा परकृपतिव्रतायाश्चरित्रदोषं कथमपि भवन्तो नाविष्कृतवन्त इति भावः । किलेत्यनुनये । ततस्तस्मात् सीताया गृहेऽवस्थानस्य युष्माकमनभिमतत्वात् सा सीता तृणमिव तुच्छशुष्कघासादिरिव शून्ये सहायरहिते वने त्यक्ता निर्वासिता, न वा अनुशोचितापि तदर्थं अनुतापोऽपि न कृतः मयेति शेषः । सीतार्थमनुतापकरणेऽपि च इदं भवतां विरागभाजनं भवामीति शङ्कयेति भावः । इदानीन्तु चिरपरिचिताः वनवासकाले सीतया सहानुभूता इति भावाः पदार्थाः तरु-विहङ्गकुरङ्गादयः मां परिद्रवयन्ति सीतास्मृतिजनकतया व्याकुलीकुर्वन्ति, अतएव अमरणैः रक्षकशून्यैः सान्त्वनाकरणार्थं रहितैरस्माभिरिति शेषः इदं रुद्यते इदं रोदनं क्रियते, अद्यापि अस्मिन्नपि समये एवं अनेन प्रकारेण मम रोदनबाधाया अकरणे-नैवार्थः प्रयोजन प्रसन्ना भवन्तु यूयमिति शेषः । सीतापरित्यागानन्तरं मम तदनुतापा-पनोदनाय तदानीं युष्माभिर्न कोपि सान्त्वप्रयोगः कृतः, तद्यथा तथा भवतु, किन्तु इदानीं तच्छोकापनयार्थं किञ्चित् रुद्यते 'वन किं करोषि राजधानीमागत्य राज्यं परिपालये'त्यादिना विघ्नं न कुरुतेति भावः ।

चिरपरिचितास्ते ते भावाः परिद्रवयन्ति मां
इदमशरणैरद्याप्येवं प्रसीदत रुद्यते ॥३२॥

तम । अतिगम्भीरमापूरणं (१) शोकसागरस्य ।(ढ)

वास । देव ! अतिक्रान्ते धैर्यमवलम्ब्यताम् । (ण)

अत्रापि सीतात्यागरूपे कारणे सत्यपि अनुतापरूपतत्कार्याभावात् विशेषोक्तिरलङ्कारः तृणमिवेत्युपमया सङ्कीर्णः । अशरणैः रुद्यत इति वाक्यमध्ये 'अद्याप्येवं प्रसीदते" इतिवाक्यान्तरप्रवेशेऽपि चमत्कारातिशयद्योतनात् 'दिङ्मातङ्गघटे"त्यादिवत् न गर्भित-त्वदोषः "गर्भितत्वं गुणः क्वापी"ति साहित्यदर्पणोक्तेः । यथा "सुधेव धवलश्चन्द्र" इति साहित्यदर्पणोदाहृतवत् "हंसीव धवलश्चन्द्रः सरांसीवामलं नभ" इति काव्या-दर्शोक्तवच्च तृणमिव त्यक्तास्य च उपमागतप्रक्रमभङ्गदोषः, उपमानोपमेययोर्विशेषणेऽपि लिङ्गवचनवैषम्ये तद्दोषास्वीकारात्, किन्तु केवलोपमानोपमेययोर्लिङ्गवचनवैषम्ये दोषाभाव एव । तदुक्तं काव्यप्रकाशे ।

"लिङ्गसंख्याविभेदेऽपि उपमानोपमेयता ।
विभक्तिः पुनरेकैव उपमानोपमेययोः ॥"

उपमेयप्राधान्यात् त्यक्तास्य च क्लीवत्वम् । इदमिति रुद्यत इति क्रियाया विशेषणम् । "भावः । पदार्थः" । इति शब्दकल्पद्रुमः । हरिणी वृत्तम् ॥३२॥

(ढ) तमिति । शोक एव सागरस्तस्य, अतिगम्भीरं अत्यन्तगभीरम् आपूरणं पूर्णता रामस्येति शेषः । उक्तवचनसमूहेन तथैवाभिव्यक्तेरिति भावः । अत्र निरङ्गं केवलरूप-कालङ्कारः ।

(ण) वासेति । अतिक्रान्ते अतीते सीतानिर्वासनादिविषये धैर्यमवलम्ब्यताम्

—(१) अवगूरणमिति क्वचित् पाठः ।

रामः। सखि! किमुच्यते धैर्य्यमिति। (त)

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः।
प्रनष्टमिव नामापि (१) न च रामो न जीवति॥३३॥

अनुतापमकार्षं त्वं तु शेषः। अतीतविषयस्यानुतापेन पुनरावर्त्तनाभावात् केवलं तत्करणेन कष्टमेवेति भावः।

(त) राम इति। धैर्य्यमिति धैर्य्यमवलम्ब्यतामिति वचनं, किं कथमुच्यते त्वयेति शेषः। मया हि धैर्य्यावलम्बनस्य परा काष्ठा प्रदर्शितेति भावः।

तदेवोपपादयति देव्या इति। देव्या सीतया शून्यस्य रहितस्य जगतो भुवनस्य अयं द्वादशः द्वादशानां पूरणः परिवत्सरः वत्सरो वर्त्तत इति शेषः। यदा सीता निर्वासिता सती मृता, तदवधि अद्य पर्य्यन्तं द्वादश वत्सरा गता इत्यर्थः। अतएव नामापि रूपचरित्रादिस्मरणस्य का कथा सीतेति नामापि प्रनष्टमिव विलुप्तमिव; सुदीर्घकालातिक्रमवशात् विस्मृत्या केनापि तस्या इदानीं नामापि नोच्चार्य्यते इति भावः। च अथ च रामो न जीवति, इति न, अपि तु जीवत्येव। सुतरां दारुणसीताशोकेन मरणावस्थाभावेऽपि यन्मम जीवनधारणं तदेव धैर्य्यस्य परा काष्ठेति भावः।

अत्र जीवनधारणरूपकार्य्यद्वारेण प्रस्तुतं प्रतीयमानं धैर्य्यरूपकारणमभिहितमिति पर्य्यायोक्तमलङ्कारः किन्तु योत्प्रेक्षया सङ्कीर्य्यते। तथाच साहित्यदर्पणः "पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते।"

अत्र परिवत्सरपदेन

"शकाब्दात् पञ्चभिः शेषात् संवत्सरादिषु वत्सराः।
संपरीदानुपूर्वाश्च तथोदापूर्विका मताः॥"

इति मलमासतत्त्वधृतविष्णुधर्म्मोत्तरवचनोक्तवत्सरविशेषो न ग्राह्यः; तथात्वे वत्सराधिक्यात् रामायणेन सह विरोधः स्यात्, सुतरां वत्सरमात्रपर्य्यायो ग्राह्यः, तथाच जटाधरः "परिवत्सरो वत्सरः" ॥३३॥

---

(१) लुप्तं सीतेति नामापि इति पाठान्तरम्।

सीता । मोहिदह्मि अज्जउत्तस्स एदेहिं वअणेहिं । (थ)

राम । एवं वत्से ! । (द)

नैताः प्रियतमा वाचः, स्नेहार्द्राः शोकदारुणाः ।
एतास्ता मधुनो धाराश्च्योतन्ति सविषास्त्वयि ॥२४॥

(थ) मोहितास्मि आर्य्यपुत्रस्य एतैर्वचनैः ।

(थ) सीतेति । आत्मानं प्रत्यनुरागबाहुल्यप्रकाशादानन्देन, आर्य्यपुत्रस्य दारुणशोकश्रवणात् दुःखेन च मोहितास्मीति भावः ।

(द) रामेति ! एवं त्वया यदुक्तं तत् सत्यमिति स्वीकरोमीत्यर्थः ।

सीताया मोहितास्मीति वाक्यं समर्थयितुमाह नैता इति । एता रामोक्ता वाचो वाक्यानि प्रियतमा न, तथातीवप्रीतिप्रदा न भवन्तीत्यर्थः । कुत इत्याह स्नेहार्द्रा इत्यादि। यतः स्नेहेन आर्द्राः प्रेमप्रकाशकत्वात् सरसाः, शोकदारुणाः शोकप्रकाशकत्वात् अतीव-रूक्षा इत्यर्थः ताः पूर्वोक्ता रामस्य एता वाचः सविषाः गरलसंयुक्ताः, मधुनः पुष्परसस्य धाराः स्रवाः त्वयि श्च्योतन्ति पतन्ति । सुतरां तत्रानन्देन दुःखेन च उभयथापि मोहो युज्यत एवेति भावः ।

अत्र वाक्यार्थहेतुकं काव्यलिङ्गं, तथा स्नेहार्द्रा अपि शोकदारुणा इति विरोधा-भासः, तथा वस्तुतस्तदानीं सीतायां सविषमधुधाराणां पतनाभावात् तत्पतनसम्बन्धोऽ-सम्भवन् 'यथा सविषा मधुधाराः पतित्वा जनं मोहयन्ति तथा एताः स्नेहार्द्राः शोक-दारुणा वाचः सीतां मोहयन्तीति बिम्बप्रतिबिम्बभावं बोधयतीति असम्भवद्वस्तुसम्बन्धा निदर्शनाऽलङ्कारश्च। एषामङ्गाङ्गिभावेन सङ्करः ।

एता रामोक्ता वाचः प्रेमप्रकाशकतया सीतायाः साधारणप्रियास्तु भवन्त्येव किन्तु शोकदारुणतया वहना शोकप्रकाशरहितप्रियवाचां मध्ये न प्रकृष्टा इति बोधयितुं नैताः प्रिया इत्यनुक्त्वा नैताः प्रियतमा इत्युक्तमिति सुधीभिर्भाव्यम् ।

रामः। अयि वासन्ति! मया खलु (ध)

यथा तिरश्चीनमलातशल्यं
प्रत्युप्तमन्तः सविषश्च दंशः।
तथैव तीव्रो हृदि शोकशङ्कु-
र्मर्म्माणि कृन्तन्नपि किं न सोढः? ॥३५॥

(ध) राम इति। खल्विति वाक्यालङ्कारे। मयेति शोकशङ्कुः सोढ इति क्रियायाः कर्तृपदम्।

यथेति। यथा अन्तर्मध्ये हृदय इत्यर्थः तिरश्चीनं तिर्य्यग्भूतं प्रत्युप्तं विद्धं अलातशल्यं ज्वलितमङ्गाररूपं शलाकं यथा च विषेण सह सविषो दंशः सर्पक्षतम्। सविषपदं विषधरसर्पक्षतपरिग्रहार्थं। तथैव हृदि, वक्षसि तीव्रो गाढः शोक एव शङ्कुः शल्यं स शोकशङ्कुः मर्म्माणि मध्यदेशान् कृन्तन्नपि स्पर्शमात्रे वा कथा छिन्दन्नपि किं न सोढः सह्यः कृतः? अपि तु सोढ एवेत्यर्थः। इतोऽधिकं किमस्ति धैर्य्यमिति भावः।

अत्र श्रौती उपमा, तथा कृन्तन्निति छेदनस्य रूपकसाधकत्वात् उपमायाश्च बाधकत्वात् निरङ्गं केवलरूपकं अर्थापत्तिश्च, एषामङ्गाङ्गिभावेन सङ्करः।

'अङ्गारोऽलातमुल्मुकं।' 'वा पुंसि शल्यं शङ्कुर्ना' इति चामरः।

'अन्तः। (अव्य) मध्यमं।' 'दंशः। (पुं) सर्पक्षत'मिति च शब्दकल्पद्रुमः।

तिरश्चीनमिति 'विभाषाञ्चेरदिक्स्त्रिया'मिति तिर्य्यक्शब्दादच्प्रत्ययान्तात् प्रातिपदिकात् स्वार्थे खप्रत्ययः। 'तेरछा' इति तिरश्चीनशब्दस्य वङ्गभाषा।

अत्रेन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजाति वृत्तम्॥३५॥

सीता । एव ह्मि मन्दभाइणी पुणोवि आयासआरिणी अज्जउत्तस्स ! (न)

रामः । एवमतिनिष्कम्पस्तम्भितान्तःकरणस्यापि मे संस्तुत-बहुतरप्रियदर्शनादुद्दामोऽयमावेगः (१) तथाहि (प)

लोलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि मया धीयते तं तमन्तः ।

(न) एवमस्मि मन्दभागिनी पुनरप्यायासकारिणी आर्य्यपुत्रस्य ।

(न, सीतेति । मन्दभागिनी दुर्भगा अहं पुनरपि पुनः पुनरपीत्यर्थः एवं एव-म्भूता आर्य्यपुत्रस्य आयासकारिणी क्लेशदायिनी । मद्विषयकशोकादहमेव तस्य हेतुरिति धिङ्मामिति भावः ।

(प) राम इति । एवमनेन प्रकारेण अतिनिष्कम्पं नितान्तनिश्चलं यथा स्यात् तथा स्तम्भितं शोकवेगनिरोधेन स्थिरीकृतं अन्तःकरणं येन तस्यापि यद्वा न धैर्य्यमवलम्बितवतोऽपीत्यर्थः मे मम अयमावेगः शोकक्षोभः संस्तुतानां परिचितानां बहुतराणां प्रियाणां तरुविहङ्गकुरङ्गादीनां दर्शनात् उद्दामः महान् जात इति शेषः । उद्दीपकदर्शनात् उद्बोध्यस्याधिक्यं स्वाभाविकमिति भावः ।

"संस्तवः स्यात् परिचय" इत्यमरः । 'उद्दामः । महान्' इति शब्दकल्पद्रुमः ।

लोलोल्लोलेति । लोलात् चञ्चलादपि उल्लोलं अतिचञ्चलमित्यर्थः तद् यथा तथा क्षुभितस्य उद्वेलितस्य करुणस्य शोकस्य यत् उज्जृम्भणं प्रकाशः तस्य स्तम्भनार्थं अवरो-धाय मया कथमपि अतिकष्टेनेत्यर्थः यो यो यत्नः आधीयते क्रियते, कोऽपि अनिर्वच-नीयः अन्तोविकारः चित्तस्याऽस्थिरता अप्रतिहतरयः केनाप्यनिवारितवेगः तोयस्य जलस्य ओघः प्रवाहः सैकतं वालुकामयं सेतुं आलिमिव तं तं यत्नं भित्त्वा भित्त्वा पुनः पुनः

---

(१) हृदयावेग इत्यपि पाठः ।

भित्त्वा भित्त्वा प्रसरति बलात् कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥२६॥

सीता। एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुक्खसंक्खोहेण पप्फुरिदणिअदुक्खं विअ आकम्पिदं मे हिअअं।(फ)

वास। स्वगतम्। कष्टम्, अभ्यापन्नो देवस्तदन्यतः क्षिपामि तावत्। प्रकाशम्। चिरपरिचितानामितेषां जनस्थानभागाना-मवलोकनेनात्मानमानन्दयतु देवः (१) ॥ (व)

(फ) एतेनार्य्यपुत्रस्य दुर्वारदारुणारम्भेण दुःखसंक्षोभेण प्रस्फुरितनिजदुःखमिवा-कम्पितं मे हृदयम्।

भङ्क्त्वा बलात् प्रसह्य वेगेनेत्यर्थः अन्तर्मनसि प्रसरति विस्तृतोभवति। अतएव मम व्याकुलभावो नासङ्गत इति भावः।

अत्र श्रौतो उपमालङ्कारः। तथा प्रथमचरणे ओजःप्रकाशकवर्णानामत्र स्थितस्य करुणरसस्य प्रतिकूलत्वात् प्रतिकूलवर्णत्वदोषः, स च 'उद्वेलन्तं प्रविततमहाशोकवेगं निरोद्धु'मिति पाठेन समाधेयः।

'सेतुराली स्त्रियां पुमा'नित्यमरः।

मन्दाक्रान्तावृत्तम् ॥२६॥

(फ) सीतेति। एतेन प्रत्यक्षीक्रियमाणेन। दुर्वारोऽनवरोध्यः अतएव दारुणः आरम्भः प्राथमिकसम्बन्धो यस्य तेन, दुःखसंक्षोभेण दुःखोद्वेलनेन प्रस्फुरितं प्रकाशितं निजं स्वकीयं दुःखं यस्मिन् तत् तथोक्तं मे मम हृदयम् आकम्पितमिव। एकविरहस्य उभयोः शोककारणत्वादिति भावः।

अत्र भावाभिमानिनी वाच्या क्रियोत्प्रेक्षाऽलङ्कारः।

(व) वासीति। कष्टम् हा दुःखमित्यर्थः। देवो रामः अभि सर्वतोभावेन

(१) चिरपरिचितानेतान् जनस्थानभागानवलोकयतु देव इति पाठान्तरम्।

रामः। एवमस्तु। इत्युत्थाय परिक्रामति।

सीता। सन्दीवणाओ ज्जेव दुक्खस्स पिअसहीविणोदणोवाआत्ति मस्से दि। (भ)

वासं। देव! देव!। (म)

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीरोधसि (१)।

(भ) सन्दीपना एव दुःखस्य प्रियसखीविनोदनोपाया इति मन्यते।

आपन्नः दारुणशोकेन नितान्तदुःखपीडनात् विपद्ग्रस्तः, ततस्मात्, अन्यतः अन्यस्यां दिशि, क्षिपामि परिचालयामि, रामस्य सनयचक्षुषी चेति शेषः। तावद्वाक्यालङ्कारे। जनस्थानभागानां जनस्थानस्यांशविशेषाणां। आत्मानं मनः।

"आपन्न आपत्प्राप्तः स्या "दित्यमरः।

"आत्मा।···मन "इति शब्दकल्पद्रुमः।।

राम इति। एवमस्तु त्वया यदुक्तं तथैव करोमीत्यर्थः। परिक्रामति इतस्ततः पादक्षेपं करोति।

(भ) सीतेति। प्रियसख्या वासन्त्या विनोदनोपाया आनन्दोत्पादनकारणानि जनस्थानस्य अंशविशेषदर्शनादीनीत्यर्थः, दुःखस्य आर्य्यपुत्रस्य मम च दारुणशोककष्टस्य सन्दीपना एव उद्बोधका एव जनका एवेत्यर्थः भविष्यन्तीति शेषः। इति मन्यते लक्ष्येत्यर्थः। तत्कालीनसकलघटनास्मारकत्वादिति भावः।

अत्र विनोदनोपायेभ्यस्तद्विरुद्ध-दुःखोत्पत्तेर्विषमालङ्कारः।

(म) वासीति। देव देवेति विषादे द्विरुक्तिः।

(१)। सं कते इति पाठभेदः।

आयान्त्या परिदुर्म्मनायितमिव त्वां वीच्य बद्धस्तया
कातर्य्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥२२॥

सीता । दारुणासि सहि ! वासन्ति ! दारुणासि, जा एदेहिं हिअअमम्मगूढ़सल्लसरिसेहिं पुणो पुणो मं मन्दभाइणीं अज्जउत्तं वि दूणावेसि । (य)

(य) दारुणासि सखि ! वासन्ति ! दारुणासि, या एतैः हृदयमर्म्मगूढ़शल्यसदृशैः पुनः पुनर्म्मां मन्दभागिनीं आर्य्यपुत्रमपि दावयसि ।

अस्मिन्निति । अस्मिन् अङ्गुल्या निर्द्दिष्टे सम्मुखवर्त्तिनि । स्वयोगव्यवस्थापने एव-शब्दः । लतागृहे निकुञ्जे स्थित इति शेषः त्वं तस्याः सीतायाः जलाद्यानेतुं गोदावरीं गताया इत्यर्थः मार्गे आगमनपथे दत्ते ईक्षणे चक्षुषी येन स तथोक्तः अभवः आसीः, सम्भवसमयादतिरिक्तविलम्बेन तदागमनप्रतीक्षया तदागमनपथं दृष्टवानासीरित्यर्थः । सा किन्तु सीता हंसैः कृतं कौतुकं जलविहारादिना कौतूहलं यया तादृशी सती गोदावर्य्यां नद्याः रोधसि तीरे चिरं अभून् स्थितेति शेषः । हंसानां विविधक्रीड़ादर्शनकौतुकात् विलम्बितवतीत्यर्थः आयान्त्या गोदावरीतीरादागच्छन्त्या तया सीतया त्वां परिदुर्म्मनायितमिव विलम्बकरणात् तच्चिन्तया सर्वतोभावेन दुःखितचित्तमिव वीक्ष्य दृष्ट्वा कातर्य्यात् त्वत्कोपसम्भावनाजनितभयेन विह्वलत्वात् अपराधं स्वीकृत्येति भावः अरविन्दकुड्मलनिभः पद्मकलिकातुल्यः अतएव मुग्धः सुन्दरः प्रणामाय स्वावनतभावज्ञापनाय अञ्जलिः पाणिद्वयसंयोगः बद्धः विहितः । कृतापराधपरिमार्जनायेति भावः ।

अत्र आर्थी उपमाऽलङ्कारः परिदुर्म्मनायितमिवेति क्रियोत्प्रेक्षा सोद्रीर्थते ।

" दुर्म्मना विमना अन्तर्म्मना " इत्यमरः ।

अदुर्म्मना दुर्म्मना इवाचरित इति दुर्म्मनायितः आचारार्थे आयिः मनसः सलोपश्च ।

शार्दूलविक्रीड़ितं वृत्तम् ॥ २७ ॥

हीतेति । हृदयमर्म्मणि वक्षोमध्ये गूढं गुप्तभावेन निखातं यत् शल्यं शङ्कुस-

राम: । चण्डि ! जानकि ! इतस्ततो दृश्यस इव, न चानुकम्पसे । (२)

हा हा देवि ! स्फुटति हृदयं, स्रंसते(१) देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ् मोहः स्थगयति, कथं मन्दभाग्यः करोमि ॥३८॥

इति मूर्च्छति ।

सदृशैः एतैः तत्तत्स्थानप्रदर्शनैः तत्तद्घटनाख्यविकारकवचनैश्चेत्यर्थः । अपिशब्दः समुच्चये आर्य्यपुत्रश्चेत्यर्थः । दावयसि सन्तापयसि । टु दु उपतापे इत्यस्य ण्यन्तं प्रयोगः । सन्तापकारिणी दारुणैवेति भावः ।

(२) राम इति । चण्डि ! अत्यन्तकुपिते ! अनवरतसीताचिन्तावशात् सीतया सह पूर्वानुभूततत्तद्वस्तुदर्शनाच "इतस्ततो दृश्यस इवे"ति रामस्य भ्रान्तिः, ननु वास्तवं किञ्चिदपि सीताया दर्शनं जातं भागीरथीवरप्रभावात् सर्वैरेव तस्या अदृश्यत्वादिति बोध्यम् । किन्त्वर्थे चकारः । किन्तु नानुकम्पसे न दयसे साक्षाद्भूता सती आलापसम्भाषणादिना मां प्रति दयां न करोषीत्यर्थः । साक्षाद्भूता सती त्वं यदालापादिकं न करोषि तत्र गतकृतनिर्वासनात् तव कोप एव कारणमिति भावः ।

"चण्डस्त्वत्यन्तकोपन" इत्यमरः ।

हाहेति । हा हा देवि ! सीते ! हृदयं वक्षः स्फुटति विदीर्य्यते, देहबन्धः शरीरस्य सन्धिबन्धनं स्रंसते स्खलति, जगत् भुवनं शून्यं पदार्थरहितं अथच अविरता अविश्रान्ता ज्वाला सन्तापो यस्मिन् तत् तथोक्तं मन्ये अनुभवामि, तथा अन्तः मध्ये ज्वलामि अन्तरं दग्धं भवतीत्यर्थः शोकाग्निनेति भावः । विधुरः शोकसन्तापेन दुरवस्थः अन्तरात्म

---

(१) ध्वंसते इति भिन्नः पाठः ।

सीता। हद्दी हद्दी पुणोवि प्पमूढ़ो अज्जउत्तो। (ल)

तम। देव ! समाश्वसिहि समाश्वसिहि।

सीता। हा अज्जउत्त ! मं मन्दभाइणों उद्दिसिअ सअल-जीअलोअमङ्गलाधारस्स दे जम्मलाहस्स वारं वारं संसइद जोविददारुणो दसापरिणामोत्ति, हा हदम्हि। (व) इति मूर्च्छति

(ल) हा धिक् हाधिक् ! पुनरपि प्रमूढ़ आर्य्यपुत्र:

(व) हा आर्य्यपुत्र ! मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमङ्गलाधारस्य ते जन्मलाभस्य वारं वारं संशयितजीवितदारुणो दशापरिणाम इति, हा हतास्मि।

जीव: सीदन् अवसन्न: सन् अन्धे अन्धङ्करणे गाढ़ इत्यर्थ: तमसि अन्धकारे मज्जतीव लीयत इव, तथा मोह: अज्ञानं विष्वक् समन्तात् सकलपदार्थानित्यर्थ: स्थगयति आवृणोति मोहावरणात् किमपि मे न ज्ञानविषयीभवतीत्यर्थ:। अतएव मन्दभाग्योऽहं कथं किं करोमि, एकान्तासामर्थ्यात् कमपि प्रतिकारं कर्त्तुं न शक्नोमीति भाव:।

अत्र दारुणदु:खरूपकार्य्यं प्रति बहूनां कारणानामुक्तत्वात् समुच्चयोऽलङ्कार:, तथा मन्दभाग्य: किं करोमीति वाक्यार्थं प्रति पूर्ववर्त्तिवाक्यार्थानां हेतुत्वात् काव्यलिङ्गं, तथा ज्वालाया दु:खविशेषत्वात् मन्ये पदप्रयोगाच्च भावाभिमानिनी वाच्या गुणोत्प्रेक्षा च एषामङ्गाङ्गिभावे न सङ्कर:।

"विधुरस्तु प्रविश्लेषे।" "सर्वतो विष्वगित्यपि"ति चामर:।

स्फुटविकसन इति विकाशार्थोऽपि स्फुटधातुरत्र धातूनामनेकार्थत्वात् विदारणार्थो मन्तव्य:।

मन्दाक्रान्ता वृत्तम् ॥ ३८ ॥

(ल) सीतेति। प्रमूढ: मूर्च्छामुपगत:।

(व) सीतेति। सकलजीवलोकमङ्गलाधारस्य सततहितचेष्टनात् निखिलप्राणिनां शुभकरस्य तव: जन्मलाभस्य लब्धजन्मन: तव: जन्मावधेरित्यर्थ: वारं वारं पुन: पुन:

तम। वत्से! समाश्वसिहि समाश्वसिहि, पुनस्त्वत्पाणिस्पर्श एव सञ्जीवनोपायो (१) रामभद्रस्य। (ञ)

वास। कथमद्यापि नोच्छ्वसिति, हा प्रियसखि! सीते! क्वासि, सम्भावयात्मनो जीवितेश्वरम्। (ष)

सीता। ससम्भ्रममुपसृत्य हृदि ललाटे च स्पृशति। (स)

वास। दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः। (ह)

संशयितं तिष्ठति याति वेति सन्देहमापन्नं जीवितं जीवनं यस्मात् स तथोक्तः अतएव दारुणः, तयोः कर्म्मधारयः; दशापरिणामः अवस्थापरिवर्त्तनं इति हेतोः हतास्मि, विम्बनाशेन प्रतिबिम्बनाशवत् देवेन प्राणेश्वरनाशात् नाशितास्मीत्यर्थः।

घटयोः संयोग इत्यत्र संयुक्तौ घटाविति प्रतीतिवत् जन्मलाभस्येत्यत्र लब्धजन्मन इति प्रतीतिः "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात्।

(ञ) तमेति। सञ्जीवनोपायः चैतन्यसम्पादनोपायः।

(ष) वासेति। अद्यापि अस्मिन्नपि क्षणे कथं न उच्छ्वसिति न चैतन्यमापद्यते। सतासोक्तिरियम्। आत्मनः स्वस्याः जीवितेश्वरं प्राणनाथं रामं सम्भावय चेतय।

(स) सीतेति। रामात् पूर्वं समाश्वसेति बोध्यम्। ससम्भ्रमं सत्वरं स्पृशति रामस्येति शेषः।

(ह) वासेति। दिष्ट्या भाग्येन, प्रत्यापन्ना प्रत्युपस्थिता चेतना संज्ञा यस्य सः विशेषचेष्टां विनापि यत् रामस्य चैतन्यमुपस्थितं तदस्माकं भाग्यमेव हेतुरिति भावः।

---

(१) जीवनोपाय इति पाठान्तरम्।

राम: । आलिम्पन्नमृतमयैरिव प्रलेपै-
रन्तर्वा बहिरपि वा शरीरधातून् ।
संस्पर्शः पुनरपि जीवयन्नकस्मा-
दानन्दादपरविधं तनोति मोहम् ॥३८॥

आनन्दनिमीलिताच एव । सखि ! वासन्ति ! दिष्ट्या वर्द्धसे । (च)

वास । देव ! कथमिव ? ।

राम: । सखि ! किमन्यत्, पुनः प्राप्ता जानकी । (क)

आलिम्पन्निति । संस्पर्शः कश्चिदनिर्व्वचनीय इति भावः अमृतमयैः पीयूषतुल्यैः प्रलेपैः लेपनैः अन्तर्वा मध्यवर्त्तिनश्च शरीरधातून् अस्थिमज्जादीन् बहिरपिवा बहिर्वर्त्तिनश्च शरीरधातून् रक्तमांसादीन् आलिम्पन्निव सम्यग्‌लिप्तान् कुर्वन्निव जीवयन् संज्ञां प्रापयन् आनन्दात् सुखोत्पादनात् अकस्मात् तत्‌क्षणात् पुनरपि अपरविधं अन्यप्रकारं मोहं अज्ञानं तनोति करोति ।

अत्र अपरविधमोहकरणासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः आलिम्पन्निवेति क्रियोत्प्रेक्षया सङ्कीर्य्यते ।

वाशब्दः अपिवाशब्दश्च समुच्चये ।

सप्तशरीरधातवः । यथा सुश्रुतः "रसासृङ्‌मांसमेदोऽस्थिमज्जशुक्राणि धातवः ।"

प्रहर्षिणी वृत्तम् ॥३८॥

आनन्देति । आनन्देन निमीलिताच एव मुद्रितनयन एव न तु वासन्त्या समालापार्थं उन्मीलितनयन इत्येवशब्दार्थः । अत्यन्तसुखानुभवसमये नयनमुद्रणं प्रायेण स्वाभाविकमिति द्रष्टव्यम् । दिष्ट्या भाग्येन । कस्यचित् मङ्गलविशेषस्य प्राप्तौ 'दिष्ट्या वर्द्धसे' इत्युक्तिः प्रायेण नाटकादौ दृश्यते ।

(क) राम इति । किमन्यत् अन्यत् किं ब्रवीमीत्यर्थः ।

वास । अयि देव ! क्व सा ? ।

रामः । स्पर्शसुखमभिनीय । पश्य, नन्वियं पुरत एव । (ख)

वास । अयि देव! किमिति मर्म्मच्छेददारुणैरेभिः प्रलापैः प्रियसखीदुःखदग्धामपि पुनर्मन्दभागिनीं मां दहसि । (ग)

सीता । ओसरिदुमिच्छामि, एसो उण चिरसब्भाव-सोम्म-सीअलेण अज्जउत्तप्फंसेण दीहदारुणं वि सन्दावं झत्ति हरन्तेण (१) वज्जलेवोवणद्धो विअ सिद्दन्तणीसहविवज्जत्थो वेवदि अवसो विअ मे हत्थो । (घ)

(घ) अपसर्त्तुमिच्छामि, एष पुनश्चिरसद्भावसौम्यशीतलेनार्य्यपुत्रस्पर्शेन दीर्घदारुणमपि सन्तापं झटिति हरता वज्रलेपोपनद्ध इव स्विद्यन्निःसहविपर्य्यस्तो वेपते अवश इव मे हस्तः ।

(ख) राम इति । नन्विति वासन्तीसम्बोधने । इयं प्राप्ता जानकी पुरत एव अग्रत एव, न तु दूरे इत्येवशब्दार्थः । वर्त्तत इति शेषः ।

(ग) वासेति । मर्म्मच्छेदेन हृदयावस्थखाघातेन दारुणैः, एभिः पुनःप्राप्ता जानकीत्यादिभिः प्रलापैः वास्तविकसीताभावादनर्थकवचनैः प्रियसख्याः सीताया दुःखेन विरहकष्टेन दग्धामपि सन्तप्तामपि मन्दभागिनीं मां किमिति कथं पुनर्दहसि वस्तुतः सीता नास्त्येव तथापि सा पुरतो वर्त्तत इति श्रवणात् तद्विरहदुःखं द्विगुणीभूयाभिवर्द्धत इति भावः ।

(घ) सीतेति । अपसर्त्तुं दूरं गन्तुम । चिरसद्भावेन चिरानुरागेण सौम्यः सुन्दरः शीतलश्च तेन । दीर्घः बहुकालीनः अतएव दारुणस्तं । झटिति शीघ्रं स्पर्शक्षण एवेत्यर्थः हरता नाशयता । वज्रलेपेन वज्रवत् कठिनलेपेन उपनद्धः बद्ध इव

---

(१) ओल्लवन्तेण इति क्वचित् पाठः ।

रामः । सखि ! कुतः प्रलापाः । (ङ)

गृहीतो यः पूर्व्वं परिणयविधौ कङ्कणधर-

श्चिरं स्वेच्छास्पर्शैरमृतशिशिरैर्यः परिचितः ।

सीता । अज्जउत्त ! सोज्जेव दाणिं सि तुमं । (च)

रामः । स एवायं तस्यास्तुहिनकरकौपम्यसुभगो-

मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥४०॥

(च) आर्य्यपुत्र ! स एवेदानीमसि त्वम् ।

हृदयं युक्त इवेत्यर्थः कथमन्यथा उत्तोलयितुं न शक्यत इति भावः । स्विद्यन् सात्विक-भावोद्रेकात् घर्म्माक्तः सन् निःसहं श्रमं यथा स्यात्तथा विपर्य्यस्तः राजगात्रोपरिपतितः अतएव अवश इव जड़इव मे मम हस्तः वेपते कम्पते । स्वगतवदुक्तिरियम् ।

(ङ) राम इति । कुतः कस्मात् हेतोः प्रलापाः 'पुनः प्राप्ता जानकी'त्यादि वाक्यानि अनर्थकानि भवेयुः अपितु कुतोऽपि नेत्यर्थः । सत्यमेव पुनः प्राप्ता जानकीति भावः ।

सम्यगनुभवप्रमाणेन तत्सत्यत्वं प्रतिपादयति गृहीत इति । पूर्वं पूर्वकाले परि-णयविधौ विवाहकरणकाले कङ्कणं विवाहकालधारणीयसूत्रं धरतीति कङ्कणधरः यः पाणिः रामस्य गृहीतः धृतः, मया रामेण मया सीतया चेति शेषः । विवाहकाले वरेण वध्वाः पाणिग्रहणस्य शास्त्रीयत्वादिति भावः । तत्र रामेण सीतायाः पाणिरेव गृहीतः, सीतायास्तु रामस्य पाणौ गृहीतेऽपि रामग्रहणं जातं अवयवेऽप्यवयविनो हस्तित्वस्वी-कारादिति न श्लेषभङ्गः । तथा यः पाणिः रामस्य अमृतशिशिरैः पीयूषतुल्यशीतलैः स्वेच्छया निजेच्छामात्रेणैव नतु केनचिदपरकारणेनेत्यर्थः ये स्पर्शास्तैः चिरं परिचितः सीतायाः पाणिरयं आर्य्यपुत्रस्यायमित्यनुकारेण विशेषेणावगतः ।

(च) सीतेति । एतच्छ्लोकार्द्धेन निजपाणि-रामचन्द्रयोरुभयोरेवावगमात्तत्र रामरूपमर्थमादाय सीता स्वगतवद्वक्तीति आर्य्यपुत्रेति । इदानीं इदानीमपीत्यर्थः त्वं

इति गृह्णाति । (छ)

सीता । हद्धी हद्धी ! अज्जउत्तप्फंससमोहिदाए प्पमादो क्खु मे संवुत्तो । (ज)

(ज) हा धिक् ! हा धिक् ! आर्यपुत्रस्पर्शसंमोहितायाः प्रमादः खलु मे सम्वृत्तः ।

स एवासि तिष्ठसि, त्वयि न किञ्चिदन्यत् लक्ष्यते इत्यर्थः । पूर्वं यथा मां प्रति तवालौकिकदयानुरागादय आसन् इदानीमपि तथैव विद्यन्ते, मम तु दुरदृष्टवशादेव नानाविधा दुरवस्था जातेति भावः ।

रामस्तु पूर्वार्द्धेन स्वाभिप्रेतं सीतापाणिरूपमेवार्थमादाय स्ववाक्यमुपसंहरति स एवायमिति । मया तुहिनानां हिमानां करकाणां वर्षोपलानाञ्च यदौपम्यं अतिशीतलत्वेन सादृश्यं तेन सुभगः सुन्दरः सुस्पृश्य इत्यर्थः, तथा ललितं कोमलं यत् लवल्याः वृक्षविशेषस्य (नोयाड़ि इति लोयाल इति च प्रसिद्धस्य) कन्दलं नवाङ्कुरः तन्निभस्तत्तुल्यः शीतल इत्यर्थः, अयं स एव तस्याः सीतायाः पाणिः करः लब्धो गृहीतः । सर्व्वथा पूर्ववदनुभूयमानत्वात् नास्त्यत्र संशय इति भावः ।

अत्र पूर्वार्द्धे स्वाभाविकैकार्थकशब्दैः सीतापाणि–रामरूपानेकार्थाभिधानात् अर्थश्लेषालङ्कारः तिस्रो लुप्तोपमाश्च, एतेषामङ्गाङ्गिभावेन सङ्करः ।

" कङ्कणं ।···हस्तसूत्रम् ।" " कन्दलं । नवाङ्कुरः " इति च शब्दकल्पद्रुमः । " तुषारस्तुहिनं हिमम् " । " वर्षोपलस्तु करका " इति चामरः ।

पूर्वमिति " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीया ।

" गृह्णामि ते सौभगत्वाय हस्त " मित्यादिमन्त्रलिङ्गात् वरस्य वध्वाः पाणिग्रहणं कर्त्तव्यतयाऽभिहितम् ।

शिखरिणी वृत्तम् ॥ ४० ॥

(छ) इतीति । गृह्णाति रामः सीताया हस्तमिति शेषः ।

(ज) सीतेति । आर्यपुत्रस्य स्पर्शेन मोहितायाः वाक्यं व्याकर्त्तं व्यग्रायाः

रामः । सखि ! वासन्ति ! आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि, तत्त्वं तावदेनां धारय । (झ)

वास । कष्टम्, उन्माद एव । (ञ)

सीता । ससम्भ्रममाक्षिप्यापसर्पति । (ट)

रामः । हा धिक् प्रमादः, हा धिक् प्रमादः । (ठ)

करपल्लवः स तस्याः सहसैव जड़ाज्जड़ः परिभ्रष्टः ।

सात्त्विकभावोद्रेकेण सम्भ्राया इत्यर्थः, प्रमादः अनवधानता संवृत्तः जातः । असावधानतयैवाहं हस्तं नापसारितवती, कथमन्यथा आर्य्यपुत्रो धर्तुं शक्नुयादिति भावः ।

अत्र प्रमादं प्रति मोहितत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

(झ) राम इति । आनन्देन निमीलितानि मुद्रितानि स्वस्वकार्य्यकरणे असमर्थानीति यावत् इन्द्रियाणि हस्तपदादीनि यस्य सः, अतएव साध्वसेन हस्तमाकृष्य सीता चेदपसरतीति भयेन परवान् पराधीनोऽस्मि हस्तेन गाढं धारयितुं चक्षुषा वा सम्यङ्निर्द्देष्टुं स्वयं न शक्नोमीत्यर्थः । तत्तस्मात् । एनां मया शिथिलभावेन धृतां सीतां धारय ।

(ञ) वासेति । उन्माद एव रामस्य मतिभ्रंश एव जातं, एतदेव कष्टं सीताशोकादपि गुरुतरं दुःखमित्यर्थः । कथमन्यथा अविद्यमानायामपि सीतायां तत्प्रत्यक्षमिवायं करोतीति भावः ।

(ट) सीतेति । ससम्भ्रमं सत्वरम्, आक्षिप्य रामधृतं स्वकरमाकृष्य अपसर्पति दूरमिति शेषः ।

(ठ) राम इति । प्रमादोऽनवधानता ममेत्यर्थः ।

कार्य्यप्रदर्शनेन कारणीभूतं प्रमादं समर्थयति करेति । सर्वत्रैव सात्त्विकभावोदयादिति हेतुर्बोध्यः । जड़ः अलस उत्तोलयितुमशक्यप्राय इत्यर्थः प्रकम्पी कम्पमानः स्विद्यन् घर्माक्तः अस्या सीतायाः स गृहीतपूर्वः करपल्लवः, जड़ादलसात्

परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन् ॥४१॥

सीता । हद्धी हद्धी ! अज्जवि अणवत्थिदत्थिमिदमूढ़घूणन्त-णअणो ण पज्जवत्थावेदि अत्ताणअं । (ङ)

(ङ) हा धिक्, हा धिक्! अद्यापि अनवस्थितस्तिमितमूढ़घूर्णमाननयनो न पर्य्यवस्थापयत्यात्मानम् ।

गाढ़ं धारयितुमसमर्थादित्यर्थः परिकम्पिनः कम्पमानात् स्विद्यतः घर्म्माक्तात् मम करात् सहसैव तत्क्षणादेव मम गाढ़धारणाभिप्रायोत्पत्तिक्षण एवेत्यर्थः परिभ्रष्टः स्खलितः । यदि सावधानतयाऽहं गाढ़ं धारयितुमशक्ष्यं तदा न तस्याः करः परिभ्रष्टोऽभविष्यत्, सुतरां मम प्रमाद एव जात इति भावः ।

अत्र परिभ्रंशं प्रति जड़त्वं परिकम्पित्वं स्विद्यत्त्वञ्च हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः करपल्लव इति लुप्तोपमया सङ्कीर्णः । परस्परस्पर्शेन सीतारामयो रुभयोरपि, सात्त्विकभावो जात इति वस्तुना वस्तुध्वनिः । तथाच साहित्यदर्पणः—

"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः ॥"

मात्रासमकलितेयमार्य्याजातिः, तथाचोक्तं श्रुतबोधे—

"यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्ये"ति ॥ ४१ ॥

(ङ) सीतेति । अनवस्थिते सहसा हस्तपरिभ्रंशेन व्याकुलतया अस्थिरे, स्तिमिते अनुभूतस्पर्शसुखस्मरणेन निश्चले कस्यचित् वस्तुनः स्मरणकाले नयनं निश्चलं भवतीति स्वभावः, मूढे कस्यां दिशि सीता द्रष्टव्येति निश्चयाभावात् अप्रतिभे, घूर्णमाने सीताया निरूपणार्थं इतस्ततो भ्रमती च नयने यस्य स तथोक्तः । अद्यापि अस्मिन्नपि समये आत्मानं हृदयं न पर्य्यवस्थापयति न प्रकृतिस्थं कर्त्तुं शक्नोतीत्यर्थः ।

तम । सखेदहासकौतुकं निर्वर्ण्य । (ढ)

सस्वेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःप्रविधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव ॥४२॥

सीता । स्वगतम् । अम्महे ! अवसेण एदेण अत्ताणएण लज्जाविदह्मि भअवदीए तमसाए, किं त्ति किल एसा मणिस्सदि, एसो दे परिच्चाओ एसो अ हिअआसङ्गोत्ति । (ण)

(ण) अहो ! अवशेन एतेनात्मना लज्जापितास्मि भगवत्या तमसया, किमिति किलैषा मंस्यति एष ते परित्यागः एष च हृदयासङ्ग इति ।

आर्य्यपुत्र इति शेषः । अकस्मादुपलब्धस्य सहसैव पुनः प्रणाशात् महासम्भ्रमेणेति भावः ।

(ढ) तमेति । तमसायाः सीतां प्रति कन्यावद्व्यवहारात् स्नेहः, सीता स्वयमेव स्पृष्टवती पुनः स्वयमेवापसृतेति हासः प्रष्टुमिच्छा भवति किन्तु वार्य्यतो न पारय-तीति कौतुकम् ।

सस्वेदेति ! वत्सा सीता प्रियस्य दयितस्य रामभद्रस्य स्पर्शसुखेन हेतुना सस्वेदानि घर्माक्तानि, रोमाञ्चितानि पुलकितानि, कम्पितानि च अङ्गानि हस्तपदाद्यवयवा यस्याः सा तथोक्ता सती मरुता वायुना नवाम्भसा नूतनवृष्टिजलेन च यथाक्रमं प्रविधूता कम्पिता सिक्ता आर्द्रीकृता च सा तथोक्ता, तथा स्फुटाः विकसिताः कोरकाः कलिका यस्याः सा स्फुटकोरका कदम्बयष्टिरिव कदम्बदण्ड इव दण्डायमानकदम्बवृक्ष इवेत्यर्थः जाता सम्भूता ।

अत्रोपमाऽलङ्कारः 'मरुन्नवाम्भः प्रविधूतसिक्ते'ति यथासंख्यालङ्कारेण सङ्कीर्य्यते ।

रोमाञ्चा एषां सञ्जाता इति रोमाञ्चितानि तारकादित्वादितच् ।

इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥ ४२ ॥

(ण) सीतेति । अवशेन जड़ेन कार्य्याकार्य्यज्ञानहीनेनेति यावत् एतेन मदीयेन

राम। (सर्वतोऽवलोक्य।) कथं नास्त्येव, नन्वकरुणे! वैदेहि!। (त)

सीता। सच्चं अअरुणह्मि, जा एवंविधं तुमं पेक्खन्ती ण धरामि ज्जेव जीविदम्। (थ)

(थ) सत्यमकरुणास्मि, या एवंविधं त्वां प्रेक्षमाणा ननु धराम्येव जीवितम्।

आत्मना मनसा द्वारेण भगवत्या तमसया लज्जापितास्मि सलज्जीकृतास्मि। मनो यदि न मामार्य्यपुत्रं प्रष्टुं न प्रैषयिष्यत् तदा नाहं तमप्राक्ष्यमिति स्पर्शकृतलज्जां प्रति मन एव हेतुरिति भावः। एष ते परित्यागः एष च हृदयस्य आसङ्गः आसक्तिः रामं प्रत्यनुराग इति यावत्। परित्यक्तायाः परित्यागकर्त्तारं प्रति महामानकरणस्यौचित्यात् इदानीमनुरागवशात् तव रामस्य समीपगमनेन तत्क्षणात् पुनः प्रत्यावर्त्तनेन च उभयोरपि क्षणभङ्गुरत्वेन तुच्छत्वात् परित्यागहृदयासक्त्योः किमपि मूल्यं नास्तीति भावः। इति एतत् एषा तमसा किमिति किं मंस्यते मनसा करिष्यति। इत्यहं शङ्के इति भावः।

लज्जापितेति ण्यन्तलज्जधातोराप्, ततः कर्म्मणि क्तः। आत्मनेति करणे तृतीया। तमसयेति तु प्रयोजककर्त्तरि तृतीया।

(त) राम इति। सर्वतः समन्ततः सर्वासु दिक्ष्वित्यर्थः। कथमिति सम्भावनार्थमव्ययम्। नास्त्येव अस्मिन् स्थाने सीतेति शेषः। नन्वित्यनुनयसम्बोधने। अकरुणे निर्द्दये। तस्यामायान्तीत्यनेनान्वयात् वाक्यसमाप्तिः।

(थ) सीतेति। या अहम्। एवंविधं दारुणमहाशोकविह्वलमित्यर्थः त्वां प्रेक्षमाणा पश्यन्ती जीवितं जीवनं धरामि बिभर्म्मि, ननु त्यजामीत्येव शब्दार्थः। दयितस्य पत्युरेवं विधशोकार्त्तदर्शनेन पत्न्या हृदयविदारणस्यौचित्यादिति भावः। ममापि मन्वित्यनुनये।

रामः । क्वासि, देवि ! प्रसीद, न मामेवंविधं परित्यक्तुमर्हसि ! (द)

सीता । अइ अज्जउत्त ! विवरीदं विअ एदं । (ध)

रामः । देवि ! प्रसीद प्रसीद, स्वेनैव लोकोत्तरेण धैर्य्येण संस्तभ्यातिभूमिगतविप्रलम्भमात्मानं, कुतोऽत्र मे प्रियसखी सीता । (न)

(ध) अयि आर्य्यपुत्र ! विपरीतमिवेदम् ।

(द) राम इति । एवंविधं दारुणमहाशोकविह्वलम् । पतिव्रतायाः पत्न्याः शोकार्त्तस्य अशरणस्य पत्युः परित्यागस्यानौचित्यादिति भावः ।

(ध) सीतेति । इदं 'न मामेवंविधं परित्यक्तुमर्हसी' ति त्वयोक्तं वचनं विपरीतमिव घटनाक्रमेण विप्रतिषिद्धमिव ; तथा च त्वमेव पूर्णगर्भतया नितान्तकातरामेकाकिनीं मां परित्यक्तवान्, नतु तद्वदहं त्वां कदापि परित्यक्तवती, सुतरामिदं तव वचनं विपरीतवत् (उल्‌टामत) प्रतिभातीति भावः । इदं विपरीतमेव इत्युक्तौ कर्कशभाषित्वं स्यात् तच्च परमपतिव्रतायाः सीताया नितान्तमनुचितम्, सुतरामिवशब्दप्रयोगेण कविना सीताया विनयो रक्षित इति भाव्यम् ।

(न) रामेति । स्वेनैव स्वकीयेनैव नतु परोपदेशजनितेनेत्येवशब्दार्थः, लोकोत्तरेण सर्वलोकातिगेन धैर्य्येण अतिभूमिगतः चरमसीमां गतः विप्रलम्भः विच्छेदः सीताविरहजनितशोक इत्यर्थः यत्र तं तथोक्तं आत्मानं स्वहृदयं संस्तभ्य प्रकृतिस्थं कुरु । आत्मना धैर्य्यावलम्बनं विना न खलु परोपदेशेन शोकोद्विग्नमनसः स्थिरता सम्भवतीति भावः ।

"विप्रलम्भो विप्रयोग" इत्यमरः । "अतिभूमिः । आधिक्य" मिति शब्दकल्पद्रुमः । प्रसीद प्रसीदेति दैन्ये द्विरुक्तिः । आत्मसंस्तम्भनेनैव मां प्रति प्रसन्नता स्यादिति भावः ।

रामः। व्यक्तं नास्ति, कथमन्यथा वासन्त्यपि तां न पश्येत्, अपि खलु स्वप्न एष स्यात्, नचास्मि प्रसुप्तः कुतो वा रामस्य स्वप्नः, सर्वथा स एवैष भगवाननेकवारपरिकल्पनानिर्म्मितो (१) विप्रलम्भः पुनः पुनरनुबध्नाति। (प)

सीता। मए ज्जेव दारुणाए विप्पलद्धो अज्जउत्तो। (फ)

(फ) मयैव दारुणया विप्रलब्ध आर्य्यपुत्रः।

(प) राम इति। नास्ति सीता न विद्यत इति व्यक्तं स्पष्टम्। अन्यथा सीताया विद्यमानत्वे वासन्त्यपि प्रभाववती वनदेवतापि कथं तां सीतां न पश्येत् द्रष्टुं न शक्नुयात्। सुतरामव सीता नास्त्येवेति भावः। एष सीतानुभवः स्वप्नः स्यात् भवेत्। अपिशब्दः सम्भावनायां खलु वाक्यालङ्कारे। इति सम्भावयामीत्यर्थः। स्वयमेव स्वप्नं निरस्यति नचेति। नच अहं प्रसुप्तो निद्रितोऽस्मि, अतएव रामस्य कुतः स्वप्नः, अपितु कथमपि नेत्यर्थः। निद्रितावस्थायां विषयानुभवस्यैव स्वप्नत्वात् निद्राऽभावेन स्वप्नस्याभाव इति भावः। तथाच साहित्यदर्पणम्।

"स्वप्नोनिद्रामुपेतस्य विषयानुभवस्तु यः।"

स्वयमेव निश्चिनोति सर्व्वथेति। स पूर्व्वानुभूत एव न पुनर्नूतन इत्येवशब्दार्थः। भगवान् अघटनीयघटनासामर्थ्यात् माहात्म्यवान्, अनेकवारपरिकल्पनया बहुवारचिन्तया निर्म्मितः कृतः विप्रलम्भः वञ्चना इयं सीतेति भ्रमबुद्धिजनिता प्रतारणेति यावत् पुनःपुनः वारं वारं मां अनुबध्नाति अनुसरति, इयं सीतेति भ्रमबुद्ध्या बहुवारं पूर्व्वं प्रवञ्चित आसं इदानीमपि तथैव प्रवञ्चितोऽस्मीत्यर्थः। वस्तुतः सीता नास्त्येव, किन्तु इयं सीतेति ज्ञानं पूर्व्ववद्भ्रान्तिरेवेति भावः।

"विप्रलम्भः।···वञ्चनं" इति शब्दकल्पद्रुमः।

(फ) सीतेति। दारुणया निर्द्दयत्वात्क्रोधनया मयैव नत्वन्येन केनचित् भ्रमादि-

---

(१) परिकल्पितनिर्म्मितः। परिकल्पितनिर्म्मितो। इतिपाठान्तरद्वयम्।

वास । देव ! पश्य पश्य । (व)

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथः
पश्यैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः ।
खड्गच्छिन्नजटायुपक्षतिरितः सीतां ज्वलन्तीं वहन्
अन्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥ ४३ ॥

नेत्यर्थः आर्यपुत्रो विप्रलब्धः प्रतारितः । यतोऽत्र विद्यमानाऽप्यहं नाश्वासयामीति भावः ।

(व) वासेति । पश्य पश्येति विस्मये द्विरुक्तिः ।

पौलस्त्यस्येति । जटायुषा जटायुना विघटितः भग्नः अयं पुलस्त्यस्यापत्यं पौत्र इति पौलस्त्यो रावणस्तस्य कृष्णेन अयसा कालवर्णेन लौहेन कृत इति कार्ष्णायसः रथो विद्यत इति शेषः । पुरतः अस्माकमग्रतः एते दृश्यमानाः पिशाचवद्वदनं येषां ते पिशाचवदनाः नानाविधविकृतमुखा इत्यर्थः कङ्कालशेषाः कालेन मांसादीनां लोपात् अस्थिमात्रावशिष्टाः खराः रावणरथवाहका आकाशचारिणो अश्वतरा विद्यन्ते इति शेषः तत् पश्य । तथा खड्गेन असिना छिन्ने जटायोः पक्षती पक्षमूलद्वयं येन स तथोक्तः अरिः तव शत्रुः रावणः ज्वलन्तीं क्रोधेन उत्तेजितां लावण्यकान्तिद्वारा समुज्ज्वलां वा सीतां वहन् धारयन् अन्तर्मध्ये व्याकुला विचलिता विद्युत् तडित् यस्य स तथोक्तः अम्बुदो मेघ इव इतः अङ्गुल्या निर्दिश्यमानादस्मात् स्थानात् द्यां आकाशं अभ्युदस्थात् उत्थितवान् ।

अत्रोपमाऽलङ्कारः । अभ्युत्पूर्वः स्थाधातुरुन्नतिरूपार्थवाचकतया ऊर्ध्वगमनार्थस्यावाचक इत्यवाचकत्वदोषः, किन्तु 'अन्तर्व्याकुलविद्युदम्बुदनिभः शत्रुर्नभस्युत्थित' इति पाठेन निर्दोषः ।

सन्न्यासिवेशधारी रावणः सीतामपहृत्य रथेनाकाशपथे गन्तुमारेभे, दशरथसखो जटायुस्तदवलोक्य युद्धेन रावणस्य रथं बभञ्ज शरीरञ्च क्षतविक्षतञ्चकार, तदा रावणो नाशायुद्धेन तस्य पक्षद्वयं छित्वा सीतां जहारेति रामायणी वार्ता । लक्ष्मणस्तुत्र्-

सीता। सभयम्। अज्जउत्त! तादो वावादीअदि अहञ्च अवहरिआमि, परित्ताहि परित्ताहि। (भ)

रामः। सवेगमुत्थाय। आः पाप! तातप्राणसीताऽपहारिन्! क्व यासि?। (म)

वासः। अयि देव! राक्षसकुलप्रलयधूमकेतो! अद्यापि ते मन्युविषयः?। (य)

(भ) आर्य्यपुत्र! तातो व्यापाद्यते अहञ्च अपह्रिये, परित्रायस्व परित्रायस्व।

मानसपुत्रस्य पुलस्त्यस्य पुत्रो विश्रवा, तस्य पुत्रो रावण इति रामायणमनुसन्धेयम्।

अत्र कश्चिन्न्न श्लोके कविना सान्तोकारान्तजटायुशब्दौ दर्शितौ। तथा च द्विरूपकोषः "जटायुश्च जटायुषा"। "द्यौ दिवौ द्वे स्त्रियामभ्र"मित्यादि। "स्त्री पचती पचमूल"मिति चामरः।

शार्दूलविक्रीडितं वृत्तम् ॥४३॥

(भ) सीतेति। तातः पितृकल्पस्य श्वशुरस्य दशरथस्य मित्रत्वेन तत्स्थानपातित्वात् पिता जटायुरित्यर्थः, व्यापाद्यते हन्यते रावणेनेति शेषः। परित्रायस्वेति सम्भ्रमे द्विरुक्तिः। मां जटायुञ्च रक्षेत्यर्थः।

(म) राम इति। आ इति कोपसूचकमव्ययम्। पाप! छलेन परप्राणपरभार्य्यापहरणात् पापयुक्त! तातस्य जटायोः प्राणाम् सीताञ्चापहरतीति स तथोक्तः यद्वादित्वात् णिन। तत्सम्बोधनम्।

"आस्तु स्यात् कोपपीडयो"रित्यमरः। पापादिशब्दाना पापयुक्तादौ निरूढा अजहत्स्वार्था लक्षणेति नैयायिकाः। उपादानलक्षणेति आलङ्कारिकाः तन्मतमनुसृत्यामरसिंहोऽप्याह च "त्रिषु द्रव्ये पापं पुण्यं सुखादि चे"ति।

(य) वासेति। राक्षसकुलस्य रावणादिराक्षससमूहस्य प्रलये विनाशे धूमकेतुः अशुभसूचको नक्षत्रविशेषः तत्सम्बोधनम्। यथा धूमकेतूदये लोकानाम्

सीता । अहो ! उम्मत्तिश्र म्हि सम्वुत्ता । (र)

रामः । अन्वर्थ एवायमधुना प्रलापो वर्त्तते । (ल)

(र) अहो ! उन्मत्तिकास्मि संवृत्ता ।

मङ्गलसूचनं स्यात् तथा रामजन्मन्यपि सति राक्षसकुलस्यामङ्गलसूचनमासीदित्यध्यात्म-रामायणे द्रष्टव्यम् । अद्यापि सकलराक्षसानामभावसमयेऽपि ते सव राक्षसवंशध्वंसकर्त्तुरित्यर्थः मन्युविषयः क्रोधविषयः ? अपितु कथमपि नेत्यर्थ इति काकुस्वरेण व्यज्यते ।

अत्र निरङ्गं केवलरूपकमलङ्कारः ।

'कुलं जनपदे गोत्रे सजातीयगणेऽपि च 'इति मेदिनी । 'अभ्रुरत्पातो धूमकेतू" इत्यमरः । "धूमः केतुरस्य । उत्पातः सधूमतारा" इति रघुनाथः ।

धूमकेतोरुदयः प्रायेण लोकानाममङ्गलसूचकः । तथा चाह वराहसंहिताटीकायां भट्टोत्पलः ।

"अचिरस्थितोऽतिकृष्टस्त्वस्तमितः स्निग्धमूर्त्तिरुदगुदितः ।

ह्रस्वतनुः प्रसन्नः केतुर्लोकस्याभावाय न शुभो विपरीतो

विशेषतः शक्रचापसङ्काशः । द्वित्रिचतुःशूलो वा दक्षिणसंस्थश्च क्षतुरकरः ।"

(र) सीतेति । उन्मत्तिका दारुणशोकभयावेगात् उन्मादरोगग्रस्ता । कथमन्यथा अतीतघटनानां वर्त्तमानवत् तोत्या आर्य्यपुत्र ! तातो व्यापाद्यत इत्यादि प्रलपामीति भावः । उन्मादमाह भावप्रकाशे--

"धीविभ्रमः सत्त्वपरिप्लवश्च पर्य्याकुला दृष्टिरधीरता च ।

अबद्धवाक्त्वं हृदयञ्च शून्यं सामान्यमुन्मादगदस्य लिङ्गम् ॥"

(ल) रामेति । अयं 'आः पाप ! ' इत्यादि पूर्वोक्तो मम वाक्यविन्यासः अन्वर्थो यथार्थ एव पूर्वं मासीदिति शेषः, नतु प्रलाप इति एवशब्दार्थः । तदानीं जटायु-प्राणसंहारकस्यादिचरत्वान्मो वनस्थितत्वादिति भावः । किन्तु अधुना प्रलापो वर्त्तते

उपायानां भावादविरतविनोदव्यतिकरै- [१]
र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत्
कथं तूष्णीं सह्यो निरवधिरिदानीन्तु विरहः [२] ॥४४॥

तदिव वचनं निरर्थकं भवतीत्यर्थः। जटायुप्राणसीताहरणयोरवास्तविकत्वात् दारुणशोकावेगेन उन्मत्तत्वाच्चेति भावः।

ज्ञात्वा तर्हि कथं प्रलापं करोषीत्यत आह उपायानामिति। उपायानां सीतोद्धारसाधनानां सन्धिविग्रहादीनां भावात् विद्यमानत्वात् अविरतः अविश्रान्तः विनोदानां मनःस्फूर्तिकराणां सीतोद्धरणाय तदन्वेषणसेतुबन्धनमन्त्रणादिव्यापाराणामित्यर्थः व्यतिकरः परस्परमिलनं येषु तैस्तथोक्तैः वीराणां लक्ष्मणहनूमदादिशूराणां विमर्दैः युद्धादिव्यापारैः जगति भुवने जनितः उत्पादितः अत्यद्भुतरसः सद्धालङ्कृतनामा रसो येन स तथोक्तः वियोगो विच्छेदः रिपूणां रावणादिशत्रूणां घातो वध एव अवधिः शेष-सीमा यस्य स तादृशः अभूत् रावणादिवधानन्तरमेव सीतया समम् अवश्यमिलनसम्भवादिति भावः। तु किन्तु इदानीमिदानीन्तनः एतत्कालवर्तीत्यर्थः विरहः सीताविच्छेदः निरवधिः असीमः अनन्तकालस्थायीत्यर्थः मृतत्वेन कदाचिदपि पुनर्मिलनासम्भवादिति भावः। अतएव कथं केन प्रकारेण तूष्णीं पूर्ववदुपायाभावात् मौनभावेन सह्यः सोढुं शक्यः स्यात् अपितु कथमपि नेत्यर्थः। परिवाहन्यायेन दारुणशोकदुःखं रोदनप्रलापादिभिरेव सोढुं शक्यते, नतु पुटपाकन्यायेन मौनभावेन भयङ्करसन्तापादत एवम्प्रलापं करोमीति भावः।

अत्रोपमानभूतात् पूर्वविरहादुपमेयस्येदानीन्तनविरहस्याधिक्यवर्णनात् व्यतिरेकालङ्कारः, वाक्यार्थहेतुकं काव्यलिङ्गमर्थापत्तिश्च एषामङ्गाङ्गिभावेन सङ्करः। तथपु वियोगशब्दे सत्यपि पुनर्विरहपदोपादानात् दर्पणोदाहृत 'जघुर्विं स' मित्यादिवत् ना-

---

(१) विनोदव्यतिकर इति क्वापि पाठः।

(२) स्यं त्वप्रतिविधः। इति पाठभेदः।

सीता । णिरवधित्ति हा हदह्मि मन्दभाइणी । [व]

इति रोदिति ।

रामः । हा कष्टम् । [श]

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,
प्रज्ञा जाम्बवतोऽपि, यत्र न गतिः पुत्रस्य वायोरपि ।

(व) निरवधिरिति हा हतास्मि मन्दभागिनी ।

रुक्षतादोषः तद्वत् सर्वनामशब्देन परामर्शे तु निर्दोष एव, तथाच 'कथं तूष्णीं सखी निरवधिरिदानीं पुनरसौ"विति ।

साहित्यदर्पणे, 'अद्भुतो विस्मयस्थायिभाव" इत्याद्युक्तोऽद्भुतरसो ज्ञेयः ।

शिखरिणी वृत्तम् ॥४४॥

(व) सीतेति । निरवधिः इदानीन्तनो वियोगः असीमो भवेदित्यर्थः, इत्यतः मन्दभागिनी दुर्भाग्यवती अहं हतास्मि, दैवेन विनष्टवत् कृतास्मि पुनर्विनाशितास्मीत्यर्थः। आर्यपुत्रस्येव सुखं इदानीन्तनविरहस्य निरवधित्वश्रवणेन पुनर्मिलनाशाया अपि असम्भवात् जीवन्त्या मम सर्वप्रकारसुखस्यासम्भवादिति भावः ।

(श) राम इति । कष्टम् । अप्रतिविधेयत्वादिदानीन्तनदुःखमसह्यमिति भावः ।

अप्रतिविधेयत्वं समर्थयति व्यर्थमिति । यत्र यस्मिन् स्थाने मे मम कपीन्द्रेण सुग्रीवेण सख्यं मैत्री व्यर्थं लोकान्तरे सैन्यप्रेरणादिसाहाय्यकरणासम्भवान्निष्फलम् । तत्कालीनविरहे तु लङ्कायां सैन्यप्रेरणादिबहुतरसाहाय्यकरणात् सफलं जातमिति भावः । यत्र च हरीणां मम सहायीभूतवानराणां वीर्यं बलं वृथा लोकान्तरे युद्धकरणासम्भवान्निरर्थकं तत्काले तु भीषणसंग्रामकरणात् सार्थकमेवासीदिति भावः । यत्र च जाम्बवतोऽपि जाम्बवन्नामकभल्लूकाधिपस्यापि प्रज्ञा तीक्ष्णबुद्धिः व्यर्थेत्यन्वयः । लोकान्तरे बुद्ध्या किमपि साधयितुमशक्यत्वात्, तत्काले तु नानाविधमन्त्रणाकौशलेन

मार्गं यत्र न विश्वकर्म्मतनयः कर्त्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये ! क्वासि भोः ! [१]॥४५॥

अतीवसकला जातेति भावः । यत्र स्थाने वायोः पुत्रस्यापि महाबुद्धिबलशालिनो हनूमतोऽपि न गतिः लोकान्तरे जीवतो जनस्य गन्तुमसामर्थ्यात् अन्वेषणाय गमनं न सम्भवतीत्यर्थः । तदानीन्तु सीतान्वेषणाय लङ्कायां हनूमतो गमनमासीदेवेति भावः । यत्र स्थाने विश्वकर्म्मणस्तनयो नलोऽपि नलनामा वानरोऽपि मार्गं सेतुबन्धनादिना पन्थानं कर्त्तुं न क्षमः तत्स्थानस्याज्ञातत्वात् न समर्थः । तदानीन्तु लङ्कायां गमनाय सेतुनिर्म्माणेन पन्थानमकार्षीदेवेति भावः । भोः प्रिये ! सीते ! सुमित्राया अपत्यं पुमान् तस्यापि तदानीं शरजालेन सर्ववीरविमर्द्दकस्य महावीरस्य लक्ष्मणस्यापि इदानीं पत्रिणां बाणानां अविषये अगोचरे अदृश्यत्वेन पतनायोग्य इत्यर्थः तत्र तादृशे क्व कस्मिन् स्थाने असि वर्त्तसे तन्निरूपयितुमपि न शक्नोमीत्यर्थः । अतएव इदानीन्तनसीतावियोग-दुःखस्य अप्रतिविधेयत्वमिति भावः ।

अत्र वर्त्तमानसीताधिष्ठानस्थानस्य अनिरूपणीयत्वं प्रति बहूनां कारणानामुक्तत्वात् समुच्चयोऽलङ्कारः, तेन च तदानीन्तनवियोगादिदानीन्तनवियोगो निरवधिः सुदुःसहश्चेति व्यतिरेकालङ्कारो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः । तथा सौमित्रेरपि पत्रिणामित्यत्र तरूपव्यञ्जनसमूहस्य सकृदनेकधासाम्यात् छेकानुप्रासश्चेत्यनयोः संसृष्टिः । तथा पूर्व-पूर्ववाक्यवत् "सौमित्रेरपि पत्रिणामविषये" इतिवाक्यस्यापि यच्छब्दनिर्द्दिश्यमानत्वं कवेरभिमतं तत्तु समस्यन्तत्वान्नोपपद्यत इति अभवन्मतसम्बन्धदोषः, स च 'सौमित्रेरपि पत्रिणां न विषयो यत्र, क्वासि तव प्रिये ! ' इति पाठेन समाधेयः ।

अञ्जनानामवानरीगर्भे वायोरौरसेन जातो हनूमान्, तथा ऋतध्वजमुनिशापात् वानररूपिण्यां विश्वकर्म्मण औरसेन घृताचीनामाप्सरोगर्भे जातो नल इति रामायणे वामनपुराणे च द्रष्टव्यम् ।

(१) मे इति भिन्नः पाठः ।

सीता । बहुमणाविदह्मि तं पुव्वविरहं । [ष]

रामः । सखि ! वासन्ति ! सुहृदामिदानीं दुःखायैव रामस्य दर्शनं, तदिदं कियच्चिरं त्वां रोदयिष्यति, तदनुजानीहि मां गमनाय । (स)

सीता । सोद्वेगं तमसामवलम्ब्य । भअवदि ! तमसे गच्छदि ज्जेव अज्जउत्तो । (ह)

रामः । वत्से ! समाश्वसिहि समाश्वसिहि, नन्वावामप्यायु-

(ष) बहु मानिताखि तं पूर्वं विरहम् ।

(ह) भगवति ! तमसे ! गच्छत्येवार्य्यपुत्रः ।

"शुकाहि-कपि-भेकेषु हरिर्ना कपिले त्रिषु"। "पवी रोप इयुद्र्योरिति चामरः ।

शार्दूलविक्रीड़ितं वृत्तम् ॥४५॥

(ष) सीतेति । "निरवधिरिदानीन्तु विरहः" इत्यादिना आर्य्यपुत्रवाक्येन तं पूर्व-विरहं रावणापहरणजनितं वियोगं बहुमानिताखि श्लाघ्यतया स्वीकारिताखि । तदानीं रावणवधानन्तरमेव मिलनात्, इदानीन्तु मिलनाशाया अप्यभावादिति भावः ।

(स) राम इति । दुःखायैव दुःखजननायैव रामस्य दर्शनं साक्षात्कारः । दुःखितस्य दर्शने सहृदयानां दुःखोत्पत्तेः स्वाभाविकत्वादिति भावः । तत्तस्मात् राम-दर्शनस्य दुःखजनकत्वात् इदं रामदर्शनं कर्त्तृ कियच्चिरं कियन्तं बहुकालम् ।

(ह) सीतेति । गच्छत्येव नतु पुनः क्षणकालमपि तिष्ठतीत्येवशब्दार्थः । सीताया हताश्वासतया उक्तिरियम् ।

(क) तमिति । अनुनये ननुशब्दः । आयुर्जीवनकालः, आयुष्मतोः दीर्घायुः शालिनोः अतिशयार्थे मतुप् । वर्षवर्द्धनमङ्गलानि , जन्मतिथिकर्त्तव्यमार्कण्डेयपूजादि मङ्गलसाधनकर्म्माणि सम्पादयितुं निर्वाहयितुं भागीरथीपदान्तिकमेव गङ्गाचरण-

अतोः कुशलवयोर्वर्षवर्द्धनमङ्गलानि [१] सम्पादयितुं भागरथी-पदान्तिकमेव गच्छावः । [क]

सीता । भअवदि ! पसीद, खणमेत्तं वि दाव दुल्लहं जणं पेक्खामि । [ख]

रामः । अस्ति चेदानीमश्वमेधाय सहधर्म्मचारिणी मे । [ग]

(ख) भगवति ! प्रसीद, क्षणमात्रमपि तावत् दुर्लभं जनं प्रेक्षे ।

समीपमेव । गङ्गायाः पूज्यत्वातिशयात् भक्तिविशेषेण पदशब्दप्रयोगः । रामप्रस्थानेन नवीकृतमपि विरहदुःखं वत्सयोः कुशलवयोर्दर्शनेन विस्मर्त्तुं शक्यासि, अथवा इतोऽधिकमतुलमानन्दमेवानुभवितुं शक्यसीति भावः ।

तिथितत्त्वे—'द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम् ।
मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा ।
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् ।
प्रह्लादञ्च हनूमन्तं विभीषणमथार्च्चयेत् ॥"

"वर्षवृद्धिर्जन्मदिन'मिति ख्यातः ।

(ख) सीतेति । प्रसीद गङ्गासमीपगमनाय क्षणकालं विलम्बात् मां प्रत्यनुग्रहं कुरु । कथं विलम्बः कर्त्तव्य इत्याह क्षणमात्रमिति । दुःखेनायासेन बहुदेवताराधनादिना लभ्यत इति दुर्लभम् । आर्य्यपुत्रस्य दर्शनलाभो बहुपुण्यजनितो बहुपुण्यजनकश्चेति भावः। अनुरागबाहुल्यात् अधिकदर्शनेच्छया सीताया इयमुक्तिः।

(ग) राम इति । रामः सीतावियोगदुःखितमात्मानमात्मनैव सान्त्वयति अस्तीति । किमस्तीति चाह । अश्वमेधाय अश्वमेधयज्ञकरणाय सहधर्म्मचारिणी पत्नीस्थानीयेति भावः ।

---

(१) वर्षग्रन्थिमङ्गलम् इति पाठान्तरम् ।

सीता। (साक्षेपं स्वगतम्।) अज्जउत्त! का सा?। [घ]

रामः। हिरण्मयी सीतायाः प्रतिकृतिः [१]। [ङ]

सीता। (सोच्छ्वासं सास्रम्) अज्जउत्त! दाणिं सि तुमम्, अम्महे! उक्खाणिदं दाणिं मे परिच्चाअलज्जासल्लं अज्जउत्तेण। [च]

(घ) आर्य्यपुत्र! का सा?।

(च) आर्य्यपुत्र! इदानीमसि त्वम्, अहो! उत्खातमिदानीं मे परित्यागलज्जाशल्यमार्य्यपुत्रेण।

(घ) सीतेति। आक्षेपेण रामवाक्याकर्णनेन सहेति साक्षेपं यद्वा रामस्य वाक्यसमाप्तिमनपेक्ष्येत्यर्थः। सा तव सहधर्मचारिणीत्यर्थः। अस्ति चेत्यादिरामवाक्यश्रवणेन 'तर्हि किमार्य्यपुत्रेण पुनः परिणीता काचिदिति' शङ्काकुलचित्तायाः सीताया उक्तिरियम्। सापत्न्यभयं हि स्त्रीणां मरणकालेऽपि तिष्ठतीति लोकप्रसिद्धम्।

(ङ) राम इति। हिरण्मयी, प्रतिकृतिः प्रतिमूर्तिः।

'प्रतिकृतिरर्चा पुंसि प्रतिनिधि'रित्यमरः।

'मुख्याभावे प्रतिनिधिः शास्त्रार्थ' इति न्यायः। तथा च कात्यायनः—

"यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः।"

अतएव मुख्यायाः सीताया अभावेन अश्वमेधे तदीयप्रतिकृतिः प्रतिनिधिरिति बोध्यम्।

(च) सीतेति। उच्छ्वासेन मानसोल्लासेन यद्वा निश्वासेन सहेति सोच्छ्वासम्। अस्रेण आनन्दाश्रुणा सहेति सास्रम्। उभयमपि वाक्यव्यक्तव्यक्रियाया विशेषणम्। त्वं खलु नितान्तसूक्ष्मदर्शितया लोकानां यथायथभावग्राही अनुरूपमानापमानकारी चेति प्रसिद्धः, तव पूर्वं पतिव्रतां मां चरित्रदोषारोपेण परित्यक्तवानिति सन्देह इव मम

---

(१) सीताप्रतिकृतिः इति पाठभेदः।

रामः । तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि । [छ]

सीता । धण्णा सा, जा अज्जउत्तेण बहु मण्णीअदि, जा अ अज्जउत्तं विणोदअन्ती आसाणिबन्धणं जादा जीअलोअस्स । [ज]

(ज) धन्या सा, या आर्य्यपुत्रेण बहु मन्यते, या च आर्य्यपुत्रं विनोदयन्ती आशानिबन्धनं जाता जीवलोकस्य ।

भाग्यदोषात् तव सुखमिव जातं, इदानीन्तु अश्वमेधानुष्ठानाय मत्प्रतिमूर्त्त्याश्रयात् यथायथभावयाहित्वं अनुरूपमानकारित्वञ्चेत्युभयमपि सम्यगेव रक्षितमिति भावः । अम्माए इति शौरसेन्यां भाषायां विस्मयहर्षसूचकमव्ययं संस्कृते तु तदुभयसूचकैकाव्ययाभावादहोशब्देनानुवादः कृतः । इदानीं सीताप्रतिकृत्यवलम्बनसमये, परित्यागेन, चरित्रदोषारोपात् निर्वासनेन या लज्जा सैव शल्यं शङ्कुः, तत् उत्खातं उन्मीलितम् । दुष्टतया मुख्यस्य अग्राह्यत्वे तत्प्रतिनिधेरपि ग्राह्यत्वासम्भवः, तेन अश्वमेधानुष्ठानाय पवित्रत्वात् मत्प्रतिमूर्त्तिग्रहणेन ममापि पवित्रत्वं स्थिरीकृतमिति भावः ।

(छ) राम इति । तत्रापि, वास्तविकसीताया अलाभेन गत्यन्तराभावात हिरण्मय्यां तत्प्रतिकृतावपि बाष्पदिग्धं अश्रुप्लुतं चक्षुर्विनोदयामि आनन्दयामि हिरण्मयीं सीताप्रतिकृतिं पश्यन्नानन्दमनुभवामीत्यर्थः । अत्र "अस्ति चेदानीमश्वमेधाय सहधर्म्मचारिणी मे हिरण्मयी सीतायाः प्रतिकृतिः" रित्येकं वाक्यम् "तत्रापि तावद्बाष्पदिग्धं, चक्षुर्विनोदयामी" इति द्वितीयं, तदुभयमपि रामेण क्रमेणैवोच्यते, किन्तु मध्ये मध्ये यथास्थानं यथासङ्गतञ्च सीतावाक्यसन्निवेशवशात् चमत्कारातिशयं पुष्णाति, तथा भागीरथीवरप्रभावान् सीतावाक्यं रामो न शृणोति अथच तादृक्सन्निवेशवशात् सीतारामयोरयं परस्परालाप इव प्रतिभातीति महाकविना निबद्धमिदं स्थानमतीवमनोहरमिति भाव्यम् ।

(ज) सीतेति । सा हिरण्मयी सीतायाः प्रतिकृतिः धन्या पुण्यवती । या हिरण्मयी सीतायाः प्रतिकृतिः आर्य्यपुत्रेण बहु मन्यते समाद्रियते धर्म्मे सहधर्म्मचारिणीकरणादिति भावः । विनोदयन्ती आनन्दयन्ती सती जीवलोकस्य प्राणिजगतः

तमः। सस्मितस्नेहास्रं परिष्वज्य। अयि वत्से! एवमात्मा स्तूयते। [झ]

सीता। सलज्जमधोमुखी स्वगतम्। परिहसिदह्मि भअवदीए तमसाए। [ञ]

वसु। महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति पुनर्यथा कार्य्यहानिर्न भवति तथास्ताम् [१]। [ट]

(ञ) परिहसितास्मि भगवत्या तमसया।

आशानिबन्धनं रामस्य गृहावस्थितौ या आशा तस्य रक्षणहेतुर्जाता। भार्य्यावियोग-दुःखिन रामस्य वानप्रस्थावलम्बनसम्भावनैव लोकानामाधिक्येन जाता, किन्तु सम्प्रति यज्ञे सहधर्म्मचरणाय हिरण्मयीं सीताप्रतिकृतिं कृत्वा तामेव सतृष्णनयनः पश्यन्नाश्वसितीति सैव रामस्य महान् सान्त्वनोपायः, सुतरामधुना गृहे तिष्ठन् राज्यं पालयिष्यतीति सा हिरण्मयीसीताप्रतिकृतिरेव लोकानामाशास्थापनहेतुरिति भावः।

निबध्यतेऽनेनेति निबन्धनं कारणं तस्य विधेयत्वेऽपि "उद्देश्यविधेययोरुद्देश्यवचनत्वमाख्यातस्य" इति वचनात् जातेत्यस्य स्त्रीत्वम्। तत्र आख्यातस्य प्रधानक्रियाया इत्यर्थः।

(झ) तमेति। धन्येत्यादिसीतावाक्यश्रवणजातकौतुकात् स्मितमीषद्धास्यं, सीतायाः कन्यास्थानपातित्वात् स्नेहः, हन्त! स्वयं तादृगादरयोग्येयं सीता अधुना प्रतिकृत्यादरमात्रादानन्दतीति शोकादस्रं तैः सह। परिष्वज्य आलिङ्ग्य। एवम् अनया स्वकीयप्रतिमूर्तिप्रशंसया आत्मा स्वः स्तूयते प्रशस्यते। प्रतिबिम्बप्रशंसया बिम्बप्रशंसा सुतरां सिद्ध्यतीति प्रकारान्तरेण आत्मप्रशंसा क्रियते इति भावः।

(ञ) सीतेति। आत्मप्रशंसा लज्जाकारणमेवेति सलज्जमित्युक्तम्। परिहसिता उपहसितास्मि। कथमन्यथा आत्मा स्तूयते इत्युच्यते इति भावः।

(ट) वासीति। तमसासीतयोर्वाक्याश्रवणात् 'अपि चेदानीं' मित्यादिराम-

---

(१) तथास्तु इति पाठान्तरम्।

सीता । पडिउला दाणिं मे वासन्दी संवुत्ता । [ठ]

तम । वत्से ! एहि, गच्छावः । [ड]

सीता । सकष्टम् । एव्वं करेह्म । [ढ]

तम । कथं वा गम्यते, यस्यास्तव [ण]

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः ।
मर्म्मच्छेदपरैर्यत्नैराकर्षो न समाप्यते ॥ ४६ ॥

(ठ) प्रतिकूला इदानीं मे वासन्ती संवृत्ता ।

(ढ) एवं कुर्व्वः ।

वाक्यस्य च तादृशकरणीयोत्तराभावात् 'तदनुजानीहि मां गमनाय' इत्यस्य उत्तरमाह महानित्यादि । अयं व्यतिकरः सम्मिलनम् अस्माकं सम्बन्धे महान् प्रसादः अनुग्रहः, त्वं यत् स्वयमागत्य अस्माभिः सह मिलितः तदेवास्मान् प्रति महानमनुग्रहं कृतवानित्यर्थः पुनः किन्तु गमनं प्रति निजराजधानीगमनविषये, यथा येन प्रकारेण कृतेनेत्यर्थः कार्य्यहानिः कर्त्तव्यच्युतिर्न भवति, तथा स प्रकार आस्तां भवतु । गन्तुमिच्छा चेद्वर्त्तते तदा गन्तुमर्हसि तवास्माकं न कापि बाधाऽस्तीति भावः ।

(ठ) सीतेति । प्रतिकूला विरोधिनी । आर्य्यपुत्रप्रस्थानानुमतिदानेन अधिककालं यावदार्य्यपुत्रदर्शने विघ्नकरणादिति भावः । एतेन रामदर्शने सीताया अतीव बलवतीच्छा व्यज्यत इति वस्तुना वस्तुध्वनिः ।

(ड) तमेति । गच्छाव आवां भागीरथीपदान्तिकमिति शेषः ।

(ढ) सीतेति । एवं भागीरथीपदसमीपगमनमित्यर्थः । इदानीमेव आर्य्यपुत्रः प्रतिष्ठत इति तदन्यकरणीयाभावादिति भावः । दारुणदुःखेन सीताया उक्तिरियम् ।

(ण) तमेति । कथं केन प्रकारेण, गम्यते त्वयेति शेषः । इदानीं तव गमनमतीवदुःखकरमिति भावः । तत्कारणमाह यस्यास्तवेति ।

सीता। णमोणमो पूव्वपुख्यजणिदद'सणाणं अज्जउत्तचरण-कमलाणं। [त] इति मूर्च्छति।

राम। वत्से! समाश्वसिहि समाश्वसिहि।

(त) नमोनमः पूर्वपुण्यजनितदर्शनानामार्य्यपुत्रचरणकमलानाम्।

प्रतुप्तस्येति। दयिते प्रिये रामभद्रदृष्ट इत्यर्थः प्रतु.तस्येव रोपितस्येव बद्धमूल-स्येवेत्यर्थः, तथा तृष्णया बलवद्दर्शनाकाङ्क्षया दीर्घस्य विशालीभूतस्य यस्यास्तव चक्षुषः मर्म्मच्छेदपरैः हृदयविदारकैरित्यर्थः यत्नैः आकर्षणप्रवृत्तिभिः आकर्षः रामदर्शनादाकर्षणं न समाप्यते न विरम्यते, अद्यापि गमन यत्नैः चक्षुराकृष्यते, चक्षुस्तु दर्शनं विहाय न प्रति-निवर्त्तितुमीच्छतीत्यर्थः। बलवद्दर्शनाकाङ्क्षया विशालीभूतं तव चक्षुः रामभद्रदृष्टे बद्ध-मूलमिव जातं सुतरां एतावता कालेनापि तस्याकर्षणं न सम्पूर्णं तदाकर्षणे च क्रिय-माणे तव हृदयं विदीर्य्यत इवेति सरलार्थः। एतावता कालेनापि दर्शनेन तव चक्षुष-स्तृप्तिर्न जातेत्यधुनापि सस्पृहं दर्शनं वर्त्तत इत्यतो गमनं तव महादुःखकरमिति भावः।

अत्र वाच्या भावाभिमानिनी क्रियोत्प्रेक्षाऽलङ्कारः।

पथ्यावक्त्रं वृत्तम्॥ ४६॥

(त) नमोनमेति। पूर्वैः पूर्वकृतैः पुण्यैर्जनितं दर्शनं साक्षात्कारो येषां तेषां तथो-क्तानां। चरणानि कमलानि पद्मानीव तेषां। अत्र "चतुर्थ्यर्थे षष्ठी"ति सूत्रे च नमःशब्दयोगे प्रसज्यमानचतुर्थ्यर्थे षष्ठी। अनुवादे मूलानुरूपशब्दप्रयोगस्यौचित्यात् तत्रापि षष्ठ्येव प्रयुक्ता। गुरुत्वात् बहुवचनम्। लुप्तोपमाऽलङ्कारः असाधारणपूर्वकृतपु-ण्येनैव एतद्दर्शनं जातमिति भक्त्यतिशयेन नमस्कृत्य तादृशपरपुण्याभावस्यैव विशेषसम्भ-वारस्मिन् जन्मनि पुनर्दर्शनमसम्भवमेवेति मन्यमाना सीता शोकावेगात् मूर्च्छतीति बोध्यम्।

सीता। (समाश्वस्य।) किञ्चिरं वा मेहन्तरेण पूर्णिमाचन्द्रस्य दंसणं। [थ]

तम। अहो! संविधानकम्। [द]

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान्।

(थ) कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम्।

(थ) सीतेति। समाश्वस्य चैतन्यं लब्ध्वेत्यर्थः, अगीतोति शेषः। अहो! नाटकादाविव लोकेऽपि यदि मूर्च्छारोगस्य समाश्वसिहीति प्रयोग एव तत्क्षणात् प्रतिकारकारी भवेत्, तदा मदीयासमाश्वासमसंख्यवत्स्वयमागङ्गीकृत्य यावज्जनो मूर्च्छति तावदेव समाश्वसिहीति ब्रूयात्, सपदि रोगी चैतन्यं लभेत, प्रचुरतरश्रमतत्कारश्च द्रष्टॄणामुत्पद्येत। कथं ममार्य्यपुत्रचरणकमलदर्शनं चिरमेव न स्यादिति पद्यं मनसि कृत्वा पद्यान्तरं भाषया व्यनक्ति कियदिति।

मेघान्तरेण मेघान्तर्धानेन मेघस्यापसरणेनेति यावत् पूर्णिमाचन्द्रस्य दर्शनं कियच्चिरं कियन्तं बहुकालं व्याप्य सम्भवेत् अपितु बहुकालं व्याप्य न भवेदित्यर्थः। पुनरपि मेघाच्छादनादिति भावः।

अत्र समादप्रस्तुतात् बहुकालपूर्णिमाचन्द्रदर्शनासम्भवात् समस्य प्रस्तुतस्य बहुकालार्य्यपुत्रचरणकमलदर्शनासम्भवस्य प्रतीतिरप्रस्तुतप्रशंसाऽलङ्कारः अर्थापत्त्या सङ्कीर्णः।

"अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये" इत्याद्यमरः।

(द) तमेति। अहो आश्चर्य्यं संविधानकं सृष्टिः; विधातुः सृष्टिरसंख्यप्रकारत्वात् अतिविचित्रा इत्यर्थः।

सम्यग् विधानं संविधानकं, स्वार्थे कप्रत्ययः।

आवर्त्त-बुद्बुद-तरङ्गमयान् विकारा-
नम्भो यथा, सलिलमेव तु तत् समग्रम् (१)

सृष्टिवैचित्र्यमेवाह एक इति। एक एव करुणो रसः सीताविषयको रामस्य शोक इत्यर्थः निमित्तभेदात् कारणवैषम्यात् आलम्बनीभूतायाः सीतायाः व्यवहारपार्थक्यादित्यर्थः भिन्नभिन्नपरिणामान् आश्रयत इव वास्तविकपक्षे तु स एक एव करुणोरस इति। यथा अम्भो जलं आवर्त्तो जलभ्रमिः (घोला) बुद्बुदो जलस्फोटः (बुड़बुड़ि) तरङ्ग ऊर्म्मिः (ढेउ) तन्मयान् तत्स्वरूपान् विकारान् परिणामान् आश्रयते, तु किन्तु, तत् आवर्त्तादिकं समग्रं समस्तं वस्तु सलिलमेव तत् जलमेव। यथा एकमेव जलं, केनचित् पदार्थेन वेगरोधे सति आवर्त्तरूपपरिणामं अभ्यन्तरे वायुप्रवेशे सति बुद्बुदाकारतां, पृष्ठतो वायोराघातेन तरङ्गतां भजते; तथा रामस्य सीताविषयक एक एव शोकः सीताया व्यवधाने विषादरूपेण, मूर्च्छानन्तरस्पर्शे हर्षरूपेण, स्मृतिरूपेण, स्तम्भरूपेण, धृतिरूपेण च परिणमते इति सरलार्थः। सुतरां विधातुः सृष्टिरतीवविचित्रेति भावः। सीतारामयोरवस्थां विलोक्य तमसायाः स्वगतवदालोचनेयम्।

अत्र श्रौतो उपमाऽलङ्कारः वाच्यक्रियोत्प्रेक्षया सङ्कीर्य्यते। अत्र, करुणोरस इत्युक्तावपि न रसस्य स्वशब्दोक्तिदोषः तादृशोक्तिं विना अभिप्रेतार्थस्य बोधयितुमशक्यत्वात्, शोक इत्युक्तावपि न निस्तारः "स्थायिसञ्चारिणोरपि" इत्यनेन स्थायिभावस्य स्वशब्दोक्तिदोषप्रसङ्गात्। अनुभावमुखेन कथने तु अभिप्रेतार्थाबोधनादिति सुधीभिर्विभावनीयं। किन्तु अम्भो यथा इत्यनेन प्रक्रम्य सलिलमेव इत्युक्तिः "एवमुक्तो मन्त्रिमुख्यै रावणः प्रत्यभाषत" इति दर्पणोदाहृतवत् प्रक्रमभङ्गदोषः, अपि च, पुनः सलिलशब्दोपादानात् पुनरुक्ततादोषश्च, तेन 'अम्भोयथा, सकलमेव तु तत्तदेवेति पाठेन तद्दोषद्वयं निरसनीयम्।

करुणरसलक्षणादिकमनुसन्धेयं, वसन्ततिलकावृत्तमिति संक्षेपः॥ ४७॥

(१) हि तत् समस्तं इति पाठान्तरम्।

रामः। अयि विमानराज! इत इतः। (ध)

इति सर्वे उत्तिष्ठन्ति। (न)

तमसावासन्त्यौ सीतारामौ प्रति। (प)

अवनिरमरसिन्धुः सार्द्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता।
स च मुनिरनुयातारुन्धतीको वशिष्ठ-
स्त्वयि (१) वितरतु भद्रं भूयसे मङ्गलाय॥ ४८॥

इति निष्क्रान्ताः सर्वे।

(ध) राम इति। सकलव्योमयानानां मध्ये पुष्पकस्य प्राधान्यात् विमानराज इत्युक्तम्। इत इतः अस्मिन्नस्मिन् पथि त्वया गन्तव्यमिति शेषः वीप्सायां द्विरुक्तिः। गन्तव्यदेशं प्रति गमनवेगसुतत्पादयितुं रामेण पुष्पकस्य आरोहीच्छानुरूपगामित्वेन सचेतनपदार्थतुल्यत्वात् सचेतनं प्रतीव तं प्रति आदेशः कृत इति प्रत्येतव्यम्।

अत्र जिज्ञास्यते, प्राचीनार्य्यविज्ञानमैपुण्यमवजानाना इदानीन्तनाः केचन सभ्यम्मन्याः भारतीयविज्ञानोन्नतिप्रमाणीभूतं पुराणादिवचनं प्रक्षिप्तं मन्यमाना ये पाश्चात्यविज्ञानगौरवगर्वेण गर्जन्ति, हन्त! ते किमिदमपि रामवाक्यं प्रक्षिप्तं मन्यन्ते?।

(न) इतीति। उत्तिष्ठन्ति स्वस्वगन्तव्यस्थानगमनायेत्यर्थः।

(प) तमसेति। तमसा सीतां प्रति, वासन्ती रामं प्रतीति यथासंख्येनान्वयः।

अवनिरिति। अवनिः पृथिवी, अमरसिन्धुर्गङ्गा, अस्मद्विधाभिः अस्मादृशीभिः किञ्चिन्माहात्म्यवतीभिरिति भावः देवताभिः सार्द्धं सह विद्यमानेति शेषः, तथा य आद्यः प्रथमः छन्दसां वेदोक्तातिरिक्तच्छन्दसां प्रयोक्ता अवतारयिता, स कुलपतिः दशसहस्रमुनीनां अन्नदानेन परिपालनपूर्वकमध्यापयिता मुनिर्वाल्मीकिः, तया अनुयाता

---

(१) तव इति पाठभेदः।

इति छाया नाम तृतीयोऽङ्कः (फ)

——:०:— —

धर्म्माचरणाय अनुगता अरुन्धती यस्य स तथोक्तः, स मुनिर्वशिष्ठश्च भूयसे प्रचुराय मङ्गलाय जगतः शुभाय त्वयि सीतायां रामे च भद्रं कल्याणं वितरतु ददातु । राज्ञो मङ्गले सति तदधीनं जगतो मङ्गलमप्यवश्यमेव भवतीति भावः ।

अत्र एकया वितरत्विति क्रियया बहूनामप्रस्तुतानामरुन्धत्यादीनां कर्तृतया सम्बन्धात् तुल्ययोगिताऽलङ्कारः ।

" क्ष्माऽवनिर्मेदिनी मही " इत्यमरः । अमराणां देवानां सिन्धुर्नदी सा सुरसरिद्गङ्गेत्यर्थः । " सिन्धुर्नद्यां महानदे " इति धरणिः ।

कुलपतिमाहुः साम्प्रदायिकाः " मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः ॥ "

आदौ भव आद्यः अपिच यहणात् ' नावसार्थ्य ' इत्यादिना आदिशब्दादयः । मालिनी वृत्तम् ॥ ४८ ॥

(फ) इतीति । छायाया इव रामेणास्पष्टमभिलक्ष्यमाणायाः सीताया घटनावलीनिबन्धनादस्याङ्कस्य छायेति नाम कृतं भवभूतिनेति बोध्यम् । तत्र छायानाम छायेत्यभिप्रकाशः, नाम्ना छायेत्यर्थः ।

" नाम प्रकाश्यसम्भाव्यक्रोधोपगमकुत्सने " इत्यमरः ।

अभिज्ञानशकुन्तले चतुर्थाङ्क इवास्मिन्नुत्तररामचरितेऽपि तृतीयाङ्कोऽयमतीवचमत्कारीति समुद्घोषयन्ति काव्यरसिकाः ।

इति श्रीहरिदाससिद्धान्तवागीशविरचितायामुत्तररामचरित-
टीकायां सर्वार्थबोधिनीसमाख्यायां तृतीयाङ्क-
विवरणं समाप्तम् ॥ ० ॥

———

अथ चतुर्थोऽङ्कः ।

ततः प्रविशतस्तापसौ ।

एकः । सौधातके ! दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य । तथाहि, (क)

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रिया-
पीतादभ्यधिकं (१) तपोवनमृगः पर्य्याप्तमाचामति ।

(क) एक इति । भूयिष्ठं यथास्यात्तथा बाहुल्य नेत्यर्थः सन्निधापिताः निमन्त्रणादिना समुपस्थापिता आनीता इति यावत् अतिथिजनाः आगन्तुकलोका यस्मिन् तस्य तथोक्तस्य, आश्रमपदस्य विशेषणमेतत् । आश्रम एव पदं स्थानं तस्य, समधिकेन प्रचुरतरेण आरम्भेण आतिथ्यसम्पादनार्थमायोजनेन रमणीयता सौन्दर्य्यं दृश्यतां । केचित् द्रव्याण्यासादयन्ति, केचित् पचन्ति, केचिदागतानभ्यर्थयितुमितस्ततो धावन्ति इत्यादिना महती कुलकुलिका वर्त्तत इत्यर्थः । समधिकारम्भं सनयंयति तथाहीति ।

"पदं व्यवसितित्राण-स्थान-लक्ष्माङ्घ्रिवस्तुषु"त्यमरः ।

सुधातुरपत्यं पुमानिति सौधातकिः "सुधातुरकङ् च" इति सुधातृशब्दादकङ् चकारादिञ् ।

नीवारेति । तपोवनमृगः आश्रमहरिणः सुतरामेव प्रचुरलीकमध्येऽपि

---

(१) अत्यधिकमिति पाठान्तरम् । अप्यधिकमिति क्वचित् पाठः ।

गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्य्यते ॥१॥

सौधा। आअदं अणज्झाअकारणं सविसेसभूदं अज्ज जिण्ण-कुच्चाणं। (ख) (१)

(ख) आगतमनध्यायकारणं सविशेषभूतमद्य जीर्णकूर्च्चानाम् ।

निर्भयप्रचार इति व्यज्यते । सद्यः अचिरं प्रसूता सन्तानं प्रसूतवती, अत एव नितरां पिपासार्त्ता इति भावः, तया प्रियया निजभार्य्यया पीनाम् आपिपासानिवृत्तेः निपीतादित्यर्थः अभ्यधिकं अतिरिच्यमानं अवशिष्टमिति यावत् उष्णं मधुरञ्च सुस्वादु च नीवारोदनस्य तृणधान्यान्नस्य मण्डं पर्य्याप्तं यथेष्टं यथास्यात्तथा आचामति पिबति । एतेन बहुलोकभोजनाय प्रचुरान्नपाकान्मण्डस्यापि प्राचुर्य्यं व्यज्यते । सर्पिष्मतः घृताक्तस्य भक्तस्य अन्नस्य स्फुरता प्रसरता गन्धेन सौरभेण मनाक् अल्पं यथा स्यात्तथा अनुसृतः अनुगतः संयुक्त इत्यर्थः कर्कन्धूफलैः वदरीफलैः मिश्राः युक्ता ये शाका वास्तूकादयः तेषां पचनात् पाकादुत्थित इत्यर्थः आमोदः गन्धः परिस्तीर्य्यते सर्वतो व्याप्तो भवतीत्यर्थः ।

अतएव समधिकारम्भ इति प्रत्यक्षमिति भावः ।

अत्र मृगोत्सगकर्त्तृकपर्य्याप्तमण्डपानेन नानासौरभप्रकाशेन च कार्य्येण कारणभूतः पाकादिसमधिकारम्भः प्रतीयत इति पर्य्यायोक्तमलङ्कारः ।

"तृणधान्यानि नीवारा" इत्यमरः (उड़िधान इति वङ्गभाषा, तिनी इति हिन्दी भाषा)। (मण्ड—माड़ फेन इति भाषा) 'कामं प्रकामं पर्य्याप्तं ।' "किञ्चिदीषन्मनागल्पे ।" "भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ।", 'कर्कन्धूर्बदरी कोली" इति चामरः । सर्पिष्मद् भक्तं (पोलाउ इति प्रसिद्धम्) ।

सद्यः प्रसूता चासौ प्रिया चेति सद्यःप्रसूताप्रिया 'पुंवन्न प्रियादौ' इति कलापसूत्रान्न पुंवद्भावः । कलापमतेऽपि प्रियाशब्दस्य पूरणाद्यन्तर्गतत्वान्न पुंवद्भावः ।

शार्दूलविक्रीड़ितं वृत्तम् ॥१॥

(ख) सौधेति । प्रथमतापसेन सौधातक इति सम्बोध्य नाम्ना परिचायितत्वात्

(१) साअदं अणोअपिआराणं जिण्णकुच्चाणं अणज्झाअकारणमिति पाठान्तरम् ।

प्रथमः । विहस्य । अपूर्वः कोऽपि ते बहुमानहेतुर्गुरुषु सौधातकि ! । (ग)

सौधा । भो भाण्डायण ! किंणामधेओ एसो महन्तस्स त्थविरसत्थस्स धुरन्धरो अज्ज अदिधी आअदो ? (घ) (१)

(घ) भो भाण्डायन ! किंनामधेय एष महतः स्थविरसार्थस्य धुरन्धरोऽद्य अतिथिरागतः ।

द्वितीय इत्यनुक्त्वा सौधातकीतिनाम्ना निर्देशं कुर्वन् "एकदेशेन समुदायो गम्यते" इति न्यायात् सौधेतिमात्रं कविरुक्तवान् । अद्य जीर्णकूर्चानां पक्वश्मश्रूणां अतिवृद्धानामित्यर्थः; आगतं आगमनं सविशेषभूतं नितान्तमित्यर्थः; अनध्यायकारणं पाठनिवृत्तिहेतुः जातमिति शेषः । यस्य कस्यचिदतिथेरागमने कश्चित् कस्मिंश्चिदवसरे यत्किमपि अर्घ्यं तु नार्हति किन्त्वत्र वृद्धानामागमनात्तेषां तत्त्वावधानाय सर्वदैव व्यग्रतया सर्वेषां सर्वथैवाध्यायो न भवेदिति ज्ञापनाय सविशेषमित्युक्तम् । वृद्धानामित्यनभिधाय जीर्णकूर्चानामित्युक्तिः सोपहासेयमुक्तिरिति प्रतीयते ।

"कूर्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे" इति मेदिनी ।

आगतमिति भावे क्तः ।

(ग) प्रथम इति । सौधातके ! गुरुषु माननीयेषु अभ्यागतेषु ते तव बहुमानस्य आदरस्य हेतुः कारणं 'आअद' इत्यादि पूर्ववचनमित्यर्थः कोऽपि अनिर्वचनीयः अपूर्वः अद्भुतः । माननीयानामसमर्चकं कश्चित् विशिष्टशब्देन सम्मानप्रदर्शनमेव समादरकारणं स्यात्, तत्र तु जीर्णकूर्चानामित्यनेन परिहासः, सुतरां न सङ्गच्छत इति भावः । अभ्यागतस्य गुरुत्वमाह अङ्गिराः—

"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः ॥

(घ) सौधेति । महतो विशालस्य बहुस्थानव्यापकस्येत्यर्थः स्थविरसार्थस्य

(१) 'त्थविरसत्थस्स' 'इत्थिआसत्थस्स' इति पाठान्तरम् ।

भाण्डायन:। धिक् प्रहसनम्। नन्वयमृष्यशृङ्गाश्रमादरुन्धती-पुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय भगवान् वशिष्ठः प्राप्तस्तत् किमेवं प्रलपसि (ङ)

सौधा। हुं वसिट्ठो। (च)

भाण्डा। अथकिम्। (छ)

सौधा। मए उण जाणिदं, वग्घो वा विओ वा एसोत्ति। (ज)

(च) हुं वशिष्ठः।

(ज) मया पुनर्ज्ञातं, व्याघ्रो वा वृको वा एष इति।

वृषवर्गस्य धुरन्धरः भारवाही श्रेष्ठ इत्यर्थः, किंनामधेयः किंनामकः। अत्र श्रेष्ठः इत्येवमनुक्त्वा धुरन्धर इत्युक्तेरुपहासप्रतीतिः धुरन्धरशब्दस्य भारवाहिनि यौगिकत्वात् वृषत्वेन दुर्बलेऽपि च तदरुम्भावादिति बोध्यम्।

(ङ) भाण्डेति। सौधातकिना 'भो भाण्डायण' इति सम्बोधनेन नाम्नः परिचायितत्वात् पूर्ववत् 'एकः' 'प्रथम इत्यनुक्त्वा भाण्डायन इत्युक्तम्। प्रहसनं उपहासं धिक् निन्दामीत्यर्थः। कथमित्याह नन्वित्यादि। नन्विति सम्बोधने। अरुन्धती पुरस्कृता अग्रवर्त्तिनी येषां तान्, दारान् भार्य्याः, अधिष्ठाय आश्रित्य नेता भूत्वेत्यर्थः। प्राप्त उपस्थितः। तत्तस्मात्, किं कथं, एवं अनेन प्रकारेण प्रलपसि उपहाससूचकं वाक्यं वदसीत्यर्थः। सर्वमान्यस्य वशिष्ठस्य उपहासकरणं तथातीवानुचितमतएव निन्दामीति भावः।

(च) सौधेति। हुमिति प्रश्नसूचकमव्ययम्। वशिष्ठः किमित्यर्थः। "हुं स्यात् प्रश्नवितर्कयो"रित्यजयः।

(छ) भाण्डेति। अथकिमित्येकं सम्मतिज्ञापनार्थमव्ययम्। ('हाँ') इति वङ्गभाषा 'औरक्या इति हिन्दीभाषा।

(ज) सौधेति। पुनः किन्तु, ज्ञातं मतम्। एष आगतः। वृकः कुक्कुराकार व्याघ्रविशेषः। 'कन्दुयाबाघ' इति बोध इति च वङ्गभाषा, 'हुण्डार इति हिन्दीभाषा

भाण्डा । आः किमुक्तं भवति ? । (झ)

सौधा । तेण परावड़िदेण ज्जेव सा वराइआ कल्लाणिआ मड़मड़ाइदा । (ञ) (१)

भाण्डा । समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रिया-

(ञ) तेन परापतितेनैव सा वराकिका कल्याणिका मड़मड़ायिता ।

पङ्गपिङ्गलवर्णकेशश्मश्रुबहुतररोमावृतसर्वशरीरत्वं प्रथमं संशयस्य कारणम् । किन्तु आकारवैषम्ये मनुष्यनिश्चयेऽपि व्याघ्रवृक संशयप्रकाशात् सोपहासोक्तिरियम् ।

"कोकस्त्वीहामृगो वृक" इत्यमरः ।

(झ) भाण्डेति । आ इति कोपसूचकमव्ययम् । उक्तं त्वयेति शेषः । ब्रह्मर्षिं वशिष्ठम् प्रति नैतादृशं वाच्यमिति भावः ।

(ञ) सौधेति । संशयस्य द्वितीयं कारणं निर्दिशति तेनेत्यादि । यस्मात् परापतितेनैव उपस्थितेनैव नतु किञ्चिद्विलम्ब्येत्येवशब्दार्थः । वराकिका क्षुद्रत्वेन आत्मरक्षणासामर्थ्यात् शोच्या, कल्याणिका कल्याणिकेति कृतनामधेया मड़मड़ायिता मड़मड़ इति शब्देन चर्विता । सुतरां व्याघ्रादिवत् रोमाद्यावृतदेहत्वात् सहसैव वत्सतरीभक्षणाच्च व्याघ्रवृकतया संशयो मे नासङ्गत इति भावः ।

"वराकः । शोचनीयः । इति शब्दकल्पद्रुमः ।

अस्थिचर्वणेन यः शब्द उत्पद्यते तस्यानुकरणं 'मड़मड़' इति शब्दः, तस्मात् "अव्यक्तानुकरणादित्यादिना डाच् प्रत्ययान्तात् 'डाच् लोहितादिभ्यश्च इत्यादिः, ततः कर्म्मणि क्तः ।

(ट) भाण्डेति । "इभेधिनो गृहस्थाः, मांसेन सह इति समांसः मधुपर्क पूजोपचारविशेषः प्रदेय इति शेषः, इति इत्यानुपूर्वीकं आम्नायं वेदं वेदवाक्यमित्यर्थः

---

(१) जं ण परावड़िदेण ज्जेव सा वराइ कविला कल्लाणी मड़मड़ाइदा इति पाठान्तरम् ।

याभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः, तं हि धर्मसूत्रकाराः समामनन्ति। (ट) (१)

बहुमन्यमाना: महाप्रसादत्वेन समाद्रियमाणा: सन्त: श्रोत्रियाय वेदविद्यादिसम्पन्नाय ब्राह्मणाय अभ्यागताय अतिथये सते वत्सतरीं अत्यल्पवयस्कां गोवत्सां, वा अथवा, महोक्षं महावृषभं, वा किम्वा, महाजं महान्तं छागं निर्वपन्ति ददति। ननु "समांसो मधुपर्क इति श्रुत्या देवायैव समांसो मधुपर्को दातव्य इत्युच्यते तत्कथं श्रोत्रियाय स दीयत इत्याह तं हीति। हि यस्मात् धर्मसूत्रकाराः धर्मशास्त्राणां स्मृतिशास्त्राणां प्रणेतारः मन्वादयः, तं श्रोत्रियाभ्यागतसम्प्रदानकं वत्सतर्या महोक्षस्य महाजस्य वा निर्वापं समामनन्ति ब्रुवन्ति। सुतरां "समांसो मधुपर्क इति श्रुतिः तदनुवादरूपस्मृतिदर्शनात् पितृदेवताऽतिथिसम्प्रदानकसमांसमधुपर्कदानपरत्वमेवबोध्यम्, अतएव वशिष्ठेन मधुपर्कसम्पृक्तमांसं भक्षितमिति दोषाभावात् कथमुपहास इति भावः।

मधुपर्क उक्तः कालिकापुराणे—

"दधि सर्पिर्जलं क्षौद्रं सितैताभिस्तु पञ्चभिः।
प्रोच्यते मधुपर्कस्तु सर्वदेवौघतुष्टये॥

श्रोत्रियमाह देवल:—"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्॥

आतिथ्ये पशुहिंसामाह स्मृतिः "पितृदेवतातिथिपूजायां पशुं हिंस्यात्।"

मनुश्च— मधुपर्के च यज्ञे च पितृदैवतकर्मणि।
अत्रैव तु पशुं हिंस्यात् नान्यथेत्यब्रवीन्मनुः॥

तत्रापि गोमांसदानमाह वशिष्ठः 'अथापि ब्राह्मणाय राजन्याय वा अभ्यागताय वत्सतरीं वा महोक्षं वा महाजं वा पचेद्देवमस्यातिथ्यं कुर्वन्ति।

कलियुगे तु मधुपर्के पशुहिंसा निषिद्धा। तथाच उदाहृतत्वस्थृतं बृहन्नारदीयपुराणम्—

---

(१) इति हि धर्मसूत्रकारा इति पाठान्तरम्।

सौधा। भो णिग्गिहीदोसि । (ठ)

भाण्डा। कथमिव । (ड)

सौधा। जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विससिदा, अज्ज एव्व पच्चागदस्स राएसिणो जणअस्स भअवदा वम्मीएणवि दहिमहूहिं एव्व णिव्वत्तिदो महुवक्को, वच्छदरी उण विसज्जिदा । (ढ)

(ठ) भोः ! निगृहीतोऽसि !

(ढ) येन आगतेषु वशिष्ठमिश्रेषु वत्सतरी विशसिता अद्यैव प्रत्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिनाऽपि दधिमधुभिरेव निर्वर्त्तितो मधुपर्कः, वत्सतरी पुनर्विसृष्टा ।

'देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ।
* * * *
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ।

'मांसादनं' गोमहिषादेरिति स्मार्त्तः, सुतरां तद्भक्षणमपि निषिद्धम् । आम्नायते अभ्यस्यते धर्म्मो यस्मात् स आम्नायः 'हलश्चे'ति घञ् । गृहैर्दारैर्मेधन्ते सङ्गच्छन्ते इति गृहमेधिनः गृहस्थाः ।

'श्रुतिः स्त्री वेद आम्नाय इत्यमरः । 'गृहमेधी । गृहस्थ" इति शब्दकल्पद्रुमः ।

(ठ) सौधेति । निगृहीतोऽसि पराजितोऽसि मयेति शेषः ।

(ड) भाण्डेति । कथमिव 'कैमन धारा इति वङ्गभाषा ।

सौधेति । आत्मना वाक्यविचारे सामर्थ्यत उक्तं भाण्डायनपराजयं विशेषेण समर्थयति येनेति । येन हेतुना । वशिष्ठमिश्रेषु ब्रह्मर्षिश्रेष्ठेषु वशिष्ठेषु । विशसितां व्यापादिता मधुपर्कार्थमिति शेषः । किन्तु अद्यैव ननु दिनान्तरे इत्यवधार्यं, दिनान्तरे

भाण्डा । अनिवृत्तमांसानामेवं कल्पमृषयो मन्यन्ते, निवृत्तमांसस्तु तत्रभवान् जनकः । (ग)

विस्मरणसम्भावना स्यात् किन्तु नात्र तथेति भावः । प्रत्यागतस्य उपस्थितस्य । वाल्मीकिनापि अनभिज्ञजने सम्यक् शास्त्रार्थावधारणाभावात् वैषम्यमपि घटेत, किन्तु अस्माभिर्न सम्यग्वेदविदा वाल्मीकिनाऽपीति अपिशब्दार्थः । निर्वर्त्तितः निष्पादितः । पुनः किन्तु, विसृष्टा मधुपर्कात् परित्यक्ता । 'समांसो मधुपर्क' इति श्रुत्यनुसारेण यदि मधुपर्के वशिष्ठाय वत्सतरी दत्ता भवेत् तदा जनकायापि सा दत्ता स्यात्, किन्तु स्वयं वाल्मीकिनैव तद्दानात् सा श्रुतिर्नातिथिविषयेति त्वं मया पराजितोऽसीति भावः । उत्तरपदे मिश्रशब्दस्य श्रेष्ठार्थत्वं शब्दकल्पद्रुमे द्रष्टव्यम् ।

विशसितेति 'शसु हिंसायामित्यस्य प्रयोगः । जनकस्येति सम्बन्धमात्रे षष्ठी । दधिमधुभिरिति बहुवचनेन घृतसंग्रहः । तथा च संयुक्तस्य तन्मिश्रितयस्यापि मधुपर्कत्वमाह तन्त्रसारधृतं वचनम् ।

'आज्यं दधिमधुमिश्रं मधुपर्कं विदुर्बुधाः ।

(ग) भाण्डेति । न निवृत्तं मांसं मांसभोजनं येषां तेषां अनिवृत्तमांसानां मांसभोजिनां जनानामित्यर्थः सम्बन्धे एवं कल्पं मधुपर्के मांसदानविधिं, मन्यन्ते समांसो मधुपर्क इति श्रुतिं श्रुत्यन्तरेण मांसाभोजिभ्यो मांसदाननिषेधात् मांसभोजिसम्प्रदानपरतयैवावधारयन्तीत्यर्थः । तु किन्तु तत्रभवान् पूज्यः जनकः निवृत्तमांसः मांसभोजनं परित्यक्तवानित्यर्थः । अतएव मांसभोजिने वशिष्ठाय मधुपर्के मांसं दत्तं, निरामिषाशिने जनकाय तु केवलाज्यदधिमधुभिरेव मधुपर्को दत्त इति न, 'समांसो मधुपर्क' इति श्रुतेरतिथिभिन्नपरत्वं मया वशिष्ठजनकाभ्यां मांसदानादानयोः काचिदप्यापत्तिरस्तीति नाहं त्वया शास्त्रविचारे पराजितोऽस्मीति भावः ।

भोजनाय मधुपर्कादौ दत्तस्य मांसस्याभोजने मनुना दोषाभिधानात् वशिष्ठेन मधुपर्के दत्तं मांसं भुक्तम् । तथा च मनुः—

सीता । किंणिमित्तम् ? । (त)

भाण्डा । स तदेव सीतादेव्यास्तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः, तथास्य कतिपये संवत्सराश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य । (थ)

(त) किंनिमित्तं ?

"नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥"

जनकस्तु वैखानसनियमवान् इति निरामिषाशी । तथा च यमः—

"भक्षयेत् प्रोक्षितं मांसं सकृद्ब्राह्मणकाम्यया ।
दैवे नियुक्तः श्राद्धे वा नियमे च विवर्जयेत् ॥"

(त) सीतेति । किंनिमित्तं जनको निवृत्तमांस इत्यर्थः । किंनिमित्तमिति निवृत्तक्रियाविशेषणम् ।

(थ) भाण्डेति । स जनकः, तदेव निर्वासनाव्यवहितपरकाल एव, तादृशं अतिदारुणमित्यर्थः । दैवस्य अदृष्टस्य दुर्विपाकं दुष्टपरिणामं वने निर्वासनमित्यर्थः, उपश्रुत्य लोकपरम्परया आकर्ण्य वैखानसः वानप्रस्थः । चन्द्रद्वीपतपोवने चन्द्रद्वीपाख्यस्य कस्यचित् स्थानस्य कस्मिंश्चिदाश्रमे तथा वैखानसरूपेण तपस्तप्यमानस्य तपस्यां कुर्वतः, अस्य जनकस्य कतिपये संवत्सराः कियन्तो वत्सरा अतीता इति शेषः ।

दैवम् च याज्ञवल्क्यः "तत्र दैवमभिव्यक्तं पौरुषं पौर्वदैहिकं ।" पूर्वजन्मकृतं पापं पुण्यं वा इह जन्मनि अभिव्यक्तं फलजननोन्मुखीभूतं सत् दैवमिति कथ्यते इत्यर्थः ।

"वानप्रस्थो वैखानसोऽग्रहः" इति त्रिकाण्डशेषः ।

सीता । तदो किंत्ति आअदो ? । (द)

आत्रेयी । चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुम् । (ध)

सीता । अवि अज्ज सम्बन्धिणीहिं समं संवुत्तं से दंसणं त्ति ? । (न)

आत्रेयी । सम्प्रतिश्च भगवता वशिष्ठेन देव्याः कौशल्यायाः सकाशं भगवत्यरुन्धती प्रहिता, यत् स्वयमुपेत्य वैदेहो द्रष्टव्य इति वत्सम् । (प)

(द) ततः किमित्यागतः ? ।

(न) अपि अद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं नवेति ? ।

तत्र वानप्रस्थो द्विविधः, पचमानकोऽपचमानकश्च ; तत्र जनकः अपचमानकः मांसादिवर्जनात् । तथाच काद्गीतमुद्धृतबौधायनवचनम्—

"वानस्थानानमांसद्वत्तीना" मित्यादि ।

(द) सीतेति । किं आगाद्येतीः ; ततस्तस्मात् चन्द्रद्वीपतपोवनादित्यर्थः ।

(ध) आत्रेयीति । चिरन्तनः बहुकालीनः प्रियसुहृत् प्रियसखः तं प्राचेतसं वाल्मीकिम् । चिरंभव इति चिरन्तनः "साथं चिर" मित्यादिना तनट् ।

(न) सीतेति । अपिशब्दः प्रश्ने । सम्बन्धिनीभिः वैवाहिकीभिः कौशल्यादिभिः समं सह, अस्य जनकस्य, दर्शनं साक्षात्कारः ।

(प) आत्रेयीति । स्वयम् आत्मना, नतु केनचित् प्रतिनिधिनेत्यर्थः तथात्वे यथासमादरशोकानां लाघवप्रतीतिः स्यादिति भावः । उपेत्य गत्वा वैदेहः विदेह-देशाधिपतिर्जनकः, द्रष्टव्यः साक्षात्कर्त्तव्यः, इति वत्सम्, सम्प्रत्येव नतु पूर्वमित्यर्थः । प्रहिता प्रेरिता । अतएव इदानीमपि जनकस्य कौशल्यादिभिः सह साक्षात्कारो न जातः, किन्तु सम्भवत इतः परं भविष्यतीति भावः ।

सौध०। जधा एदे त्थविरा परप्परम्मिलिदा, तधा अह्मेवि वडुकेहिं समं मिलिअ अणज्झाअमहुसवं खेलन्ता सम्भावेह्म।

इति परिक्रान्ताः। (फ)

भाण्डा०। तदयं ब्रह्मवादी पुराणराजर्षिर्जनकः प्राचेतस-वशिष्ठावुपास्य सम्प्रत्याश्रमवर्हिर्वृक्षमूलमधितिष्ठति, य एषः।(ब)

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते।

(फ) यथा एते स्थविराः परस्परमिलिताः, तथा वयमपि वटुकैः समं अनध्यायमहोत्सवं खेलन्तः सम्भावयामः।

(फ) सौधेति स्थविरा वृद्धाः जनकवशिष्ठादयः। वटुकैः अपरापरबालकैः। अनध्याये पाठनिषेधदिवसे चिरानुष्ठितो यो महोत्सवः क्रीडानन्दकरव्यापारः तं, खेलन्तः खेलां कुर्वन्तः सम्भावयामः सम्पादयामः; अस्मिन्ननध्यायदिवसे चिरानुष्ठितखेलारूपं महोत्सवं कुर्म इत्यर्थः। छात्रा हि अनध्यायदिवसागमे अप्यानन्दमनुभवन्ति। परिक्रान्ताः, सौधातकिभाण्डायनौ गन्तुं पादविक्षेपं कुरुत इत्यर्थः।

"बालको माणवो बालः किशोरो वटुरित्यपि" इति शब्दरत्नावली।

वटुक इति अल्पार्थे कप्रत्ययः।

(ब) भाण्डेति। स चासौ अयञ्चेति तदयं सोऽयमित्यर्थः। ब्रह्मवादी वेदवक्ता, पुराणः प्राचीनः, राजा सन् ऋषिः राजर्षिः। प्राचेतसवशिष्ठौ वाल्मीकिवशिष्ठौ उपास्य साक्षात्कारालापादिना सन्तोष्येत्यर्थः। य एष इत्यस्य शोकस्यतप्यत इत्यनेनान्वयः। "वेदस्तत्त्वं तपो ब्रह्म" त्यमरः।

वृक्षमूलमिति "आधारोऽधिशीङ्स्थासां कर्म" इत्यनेन अधिकरणस्य कर्मत्वम्।

हृदीति। अन्तरभ्यन्तरे प्रसक्तः परिव्याप्तः दहनो वह्निर्यस्य स तथोक्तः; अतएव ज्वलन् दीप्यमानो वनस्पतिः शमीवृक्ष इव य एष जनकः हृदि चित्ते नित्यानुषक्तेन

अन्तःप्रसृप्तदहनो ज्वलन्निव वनस्पतिः ॥ ॥ २ ॥

इति निष्क्रान्ते । (भ)

विष्कम्भकः । ॥ ० ॥ (म)

चिरावस्थितेन सततमनुभूयमानेनेत्यर्थः सीतायाः शोकेन निर्वासनदुःखेनेत्यर्थः तप्यते सन्तापमनुभवति ।

अत्र श्रौतुपमाऽलङ्कारः । तथा साधारणवनस्पतीनामभ्यन्तरे वह्निसम्भावो नास्त्येव किन्तु वनस्पतिविशेषस्य शमीरूपस्यैव, तेन विशेषे वक्तव्ये साधारणस्योक्तत्वात् विशेषे अविशेषाख्यदोषः, स च "ज्वलन्निव शमीद्रुम" इति पाठेन समाधेयः ।

पथ्यावक्त्रं वृत्तम् ॥ २ ॥

(भ) इतीति । निष्क्रान्ते, सौधातकिभाण्डायनौ रङ्गालयादिति शेषः ।

(म) विष्केति । विष्कम्भकलक्षणादिकमुक्तम् । मध्यमपात्राभ्यां सौधातकिभाण्डायनाभ्यामृषिकुमाराभ्यां प्रयोजितत्वात् अयं शुद्धो विष्कम्भकः । तथाच साहित्यदर्पणः—

"मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः । शुद्धःस्यात् ।"

अत्र "स तदैव सीतादिव्यास्ताहृश दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः" इत्यादिना "नन्वयमृष्यशृङ्गाश्रमा" दित्यादिना च वृत्तकथांशानां निदर्शनं, तथा "सम्प्रत्यथ भगवता वशिष्ठेन" इत्यादिना वर्तिष्यमाणकथांशानाञ्च निदर्शनं बोध्यम् ।

---

* अन्तःप्रदीप्तदहन इति पाठान्तरम् ।

† तरुरिवेति पाठभेदः ।

ततः प्रविशति जनकः ।

जन । अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन् मर्म्माणि क्रकच इव मन्युर्विरमति ॥ ३ ॥

अपत्य इति । अपत्ये सन्तानरूपायां सीतायां तादृक् अतिदारुणं यत् दुरितं पापं पूर्वं पापजनितनिर्वासनदुःखमित्यर्थः । अभवत्, महता विशालेन, तीव्रेण तीक्ष्णेन, व्रणितं क्षतं हृदयं वक्षो यस्मात् तेन, व्यथयता पीड़यता तेन दुरितेन सीताया निर्वासनदुःखेनेत्यर्थः विषक्तः हृदये गाढ़ं निहितः, पटुः विदारणसमर्थः धारया अविच्छिन्नप्रवाहेण निशितायभागेन च वहति प्रचरतीति धारावाही सर्वदाऽवस्थितः, शितधारश्चेत्यर्थः, तथा चिरेणापि कालेन बहुकालेनातीतेनापीत्यर्थः । नव इव प्रतिदिनं नूतन इव मे मम मन्युः सीताशोकः, क्रकच इव करपत्रमिव (करात इति यस्य बङ्गभाषा) मर्म्माणि हृदयसन्धिस्थानानि निकृन्तन् छिन्दन् विदारयन्नित्यर्थः नहि नैव विरमति निर्वाणं गच्छति । सर्वस्यापि पदार्थस्य कालेन लोपसम्भवेऽपि सीताशोकोऽयं इदानीमपि प्रतिदिनं नूतन इव सन् मां दहतीति भावः ।

अत्र पूर्णोपमाऽलङ्कारः तथा नव इवेति भावाभिमानिनी वाच्या गुणोत्प्रेक्षा च, इत्यनयोरङ्गाङ्गिभावेन सङ्करः । हिशब्द एवार्थे तस्य च नञा अन्वयः, तेन न निरर्थकता दोषः । नञसमभिव्याहाराच्च न अक्रमतादोषोऽपि ।

" क्रकचो ऽस्त्री करपत्रम् ।" " मन्युर्दैन्ये क्रतौ क्रुधि " इति चामरः ।

व्रणः सञ्जातोऽस्येति व्रणितं तारकादित्वादितच् । चिरेणेत्यव्ययं ततोऽपवर्गार्थे जातायास्तृतीयाया " अव्ययाच्चे " ति लोपः ।

शिखरिणी वृत्तम् ॥ ३ ॥

कष्टम्, एवं नाम जरसा दुःखेन च दुरासदेन भूयः पराकसान्तपनप्रभृतिभिस्तपोभिरात्तरसधातुरनुपयुज्यमानो (१) नाद्यापि मे दग्धदेहः पतति। अन्धतामिस्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते। अनेकसंवत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावनास्पष्टनिर्भासः (२) प्रत्यग्र इव दारुणो न मे दुःखसंवेगः

(अ) कष्टमित्यादि। कष्टं अहो दुःखमित्यर्थः, कष्टमित्युग्राश्चर्यं निश्वसितमिति बोध्यम्। दारुणं दुःखमिदमिति भावः। एवं नाम एवम्भूतेन सुस्पष्टेनेत्यर्थः, जरसा वार्द्धकेन, दुरासदेन दुःसहेन दुःखेन च सीताशोकजनितेनेत्यर्थः, भूयः पुनरपि पराको द्वादशाहोपवाससाध्यो व्रतविशेषः सान्तपनं द्व्यहसाध्यो व्रतविशेषः, पराकसान्तपने प्रभृती आदी येषां तैः, तपोभिर्वैधकर्मैर्नानाविधव्रतोपवासादिभिरित्यर्थः आत्ता गृहीताः शोषिता इत्यर्थः रसधातवः देहस्थाः द्रवपदार्था रसाः मांसादयश्च धातवो यस्य सः तथोक्तः, अनुपयुज्यमानः अनुपयुक्तः क्षीणदुर्बलत्वात् सर्वस्मिन्नेव राज्यशासनपरिरक्षणादिव्यापारे असमर्थ इत्यर्थः। दग्धो दग्धवदसारः देहो न पतति न नश्यति। अविरतमेव दारुणदुःखमनुभवति ममेदानीं मरणमेव श्रेय इति भावः।

ननु तर्हि आत्महत्यैव क्रियतामित्याह अन्धेत्यादि। हि यस्मात् ये जना आत्मघातिनो भवन्तीति शेषः, तेभ्यो जनेभ्यः, अन्धं अन्धकरणं तामिस्रं अन्धकारसमूहो येषु ते, असूर्याः सूर्यालोकशून्याः सर्वप्रकारालोकरहिता इत्यर्थः, नाम असूर्या इति नाम्ना प्रकाशिता इत्यर्थः, ते प्रसिद्धाः, लोकाः स्थानानि, प्रतिविधीयन्ते निर्दिश्यन्ते विधात्रेति शेषः। सुतरामात्महत्यापि कर्तुं न शक्यत इति भावः।

---

(१) अनवरुग्ण इति पाठान्तरम्।

(२) प्रतिक्षणपरिभावनया स्पष्टनिर्भास इति पाठभेदः।

प्रशाम्यति । अयि मातर्देवयजनसम्भवे देवि सीते! ईदृशस्ते निर्माणभागः परिणतः, येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते । हा हा पुत्रि ! (य)

अहो किञ्चित् प्रतीक्ष्यतां, कालेन सर्वं सैव क्षयात् तथापि शोकक्षयो भविष्यतीत्याह अनेकेत्यादि । प्रतिक्षणं परिभावनया सीताचिन्तया स्पष्टः व्यक्तः निर्भासः प्रकाशो यस्य स तथोक्तः, प्रत्यय इव नूतन इव प्रतीयमान इत्यर्थः । प्रशाम्यति नश्यति । अतः कालेनापि अस्य शोकस्य क्षयाशा सुदूरपराहतैवेति भावः ।

ईदृश एवम्प्रकारः, कुत्सितापवादेन निर्वासनादरण्ये एकाकिन्याः शोचनीयमरणान्वित इत्यर्थः, ते तव निर्माणभागः सृष्टेरंशः जीवनशेषभाग इति तात्पर्य्यम् । येन तादृशदुष्परिणामेन हेतुना । स्वच्छन्दं इच्छानुरूपं, आक्रन्दितुं रोदितुं । चरित्रदोषापवादेन निर्वासितायाः निमित्तं रोदने तत्सहानुभूतिप्रकाशेन दुश्चरित्ताप्रश्रयदानप्रकाशात् महती निन्दा स्यादिति भावः ।

"गुणे रागे द्रवे रस" इत्यमरः । "धातुः स्याद्रसरक्तादा"वित्यजयः ।

"प्रत्ययोऽभिनवो नव्यः" । "अभिप्रायश्छन्द आशय" इति चामरः ।

तमिस्राणामिदं झन्दमिति तामिस्रं अन्धकारसमूहः "तस्येद"मित्यण् । तेभ्य इति तादर्थ्ये चतुर्थी ।

पराकव्रतमाह मनुः "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।

पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः ।"

सान्तपनमाह याज्ञवल्क्यः "कुशोदकञ्च गोक्षीरं दधि मूत्रं शकृद्घृतम् ।

प्राश्यापरेऽह्न्युपवसेत् कृच्छ्रं सान्तपनं चरन् ॥"

"वैधर्म्ये शरप" इति प्रायश्चित्तस्थादौ स्मार्ताभिप्रायः ।

आत्मघातिनां गाढान्धकारावृतासूर्य्यनामकनरकमाभिरुक्ता वाजसनेयसंहितायाम् । यथा—

अनियतरुदितस्मितं विराजत्-
कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जु (१) जल्पितं ते ॥ ४ ॥

"असूर्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥"

अनियतेति । अनियते अनिर्द्दिष्टे रुदितस्मिते क्रन्दनहास्ये यस्मिन् तत् तथोक्तं हेतुं विनैव इदानीमेव रुदत् इदानीमेव च हसदित्यर्थः, तथा विराजन्ति शोभमानानि कतिपयकोमलदन्ता कियत्संख्यकसुकुमारदशनाः कुड्मलाग्राणि मुकुलाग्रभागा इव यस्मिन् तत् तथोक्तं, तथा स्खलत् सम्पूर्णोच्चारणसामर्थ्याभाववशात् असम्पूर्णाक्षरं असमञ्जसं असम्बद्धं अनुत्पन्नयथायथवाक्यज्ञानत्वात् "मया गच्छति, त्वं पिबामि" इत्येवं रूपं क्रियादिव्याकरणानुसारियोग्यसमावेशरहितमित्यर्थः, तथापि मञ्जु सुश्राव्यत्वात् मनोहरं जल्पितं भाषितं वाक्यमिति यावत् यस्मिन् तत् तथोक्तं, शिशोः, दन्तजननं सप्तमे मासीति स्मृतेः सप्तममासादिशैशवावस्थायां स्थितायाः इत्यर्थः ते तव वदनं कमलमिव तत् वदनकमलकं पद्मवत् सुन्दरं मुखं स्मरामि, विनष्टे वस्तुनः स्मरणमेव शोक इति शोकलक्षणात् सीतास्मरणात् शोकेनाभिभूतोऽस्मीत्यर्थः ।

अत्र यथावद्वर्णनात् स्वभावोक्तिरलङ्कारः, तथा रुदितस्मितादीनां मुख एव सम्भवे न उपमासाधकसद्भावात् रूपकस्य च बाधकत्वात् लुप्तोपमाद्वयमित्येतेषामङ्गाङ्गिभावेन सङ्करः । प्रथमपादे तकारस्यासकृत् साम्यात् वृत्त्यनुप्रासः, असमञ्जसमञ्जु इत्यत्र छेकानुप्रासश्चेति संसृष्टिः ।

---

(१) मुग्धेति पाठान्तरम् ।

भगवति वसुन्धरे ! सत्यमतिदृढासि । (२)

त्वं वह्निर्मुनयो वशिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रवोः कुलगुरुर्देवः स्वयं भास्करः ।
विद्यां वागिव यामसूत भवती, शुद्धिं गतायाः पुर- (१)
स्तस्यास्त्वं दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः ? ॥५॥

"सनखम् समाख्यातमभाक्तौचितयोरपो" व्यजयः ।
रुदित-स्मित-जल्पितपदानि भावे क्तप्रत्ययान्तानि । कमलकमित्यल्पार्थे कप्रत्ययः ।
पुष्पिताया वृत्तम् । अस्यानुरूपः श्लोको यथा शाकुन्तले
"आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति" ॥४॥

(२) भगवतीति । सत्यं निश्चितम् अतिदृढा अतिकठिनहृदया ।

अतिदृढत्वं प्रतिपादयति त्वमिति । त्वं महाप्रभाववती भवती, वह्निः अन्तर्यामी अग्निदेवः, मुनयः तपस्याप्रभावेण सर्वज्ञाः वशिष्ठवाल्मीकिप्रभृतयः ऋषयः, वशिष्ठगृहिणी महापतिव्रतात्वेन सर्वज्ञा अरुन्धती, स्वतो महामाहात्म्यवती गङ्गा च, यदिवा तथा, रवेः कुलगुरुः वंशस्यादिपुरुषः, देवः महामाहात्म्यशालीत्यर्थः, स्वयं साक्षादित्यर्थः भास्करः सूर्यश्च यस्याः सीतायाः माहात्म्यं चरित्रोत्कर्षं पातिव्रत्यमित्यर्थः, विदुः जानन्ति । तथा वाक् उपनिषद्वाणी विद्यामिव ब्रह्मज्ञानमिव, भवती त्वं, यां सीतां, असूत प्रसूतवती, पुरः अग्रतः स्वसमीपे इत्यर्थः तव सर्वव्यापित्वेन लङ्कायामपि स्थित-त्वादिति भावः, शुद्धिं निर्दोषत्वं गतायाः प्राप्तायाः अग्निपरीक्षया सर्वथा निर्दोषत्वेन निर्णीताया इत्यर्थः तस्या दुहितुः तनयायाः सीतायाः तथा तादृक् दारुणं शोचनीयञ्चेत्यर्थः विशसनं हिंसां चरित्रदोषापवादेन महारण्ये निर्वासनात् विनाशनमित्यर्थः, हे दारुणे ! निष्ठुरे ! त्वं किं केन प्रकारेण अमृष्यथाः सोढवती । दुश्चरित्रायाः चरित्रहीनेन विनाशनं शास्त्रानुसारेण समुचितत्वात् मर्षणैव सह्यते, किन्तु स्वयं विदितशुद्धचरित्रायाः अग्निपरीक्षादिभिश्च निर्दोषत्वेन प्रमितायाः

(१) तदत्तु यां इत्येवममिति पाठान्तरम् ।

नेपथ्ये। इत इतो भगवतीमहादेव्यौ। (ल)

जनकः। दृष्ट्वा। अये! गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती। उत्थाय। कां पुनर्महादेवीत्याह?। निरूप्य। हा कथं महाराजदशरथस्य धर्म्मपत्नी (१) प्रियसखी मे कौशल्या, क एवं प्रत्येति सैवेयमिति। (व)

पिशितः स्वतनयायाः यत्तादृशं दारुणपरिणामं त्वं सोढुं शक्नोषि, अतएवातिदृढ़ासीति भावः।

अत्र एकया विदुरिति क्रियया बहूनां कर्त्तृतासम्बन्धेनान्वयात् तुल्ययोगिताऽलङ्कारः श्रौती उपमा च, अनयोर्भिन्नयोर्निरपेक्षतया स्थितिः संसृष्टिः, तथा त्वमित्येकं युष्मत्कर्त्तृकपदं अन्यानि च नामकर्त्तृपदानि इत्युभयोरेकक्रियासम्बन्धे तत्र "युगपद्वचने परः पुरुषाणा"मित्यनेन मध्यमपुरुषप्राप्तौ विदुरिति प्रथमपुरुषविभक्तिप्रयोगात् च्युतसंस्कारता-दोषः, स तु 'गङ्गा च यस्या विदु'रित्यत्र 'यस्या विद स्वर्नदी'इति पाठेन समाधेयः। तत्पाठेन विद इति मध्यमपुरुषबहुवचने निपातः, स्वर्नदी गङ्गा, चकारतुल्यार्थकयदिवा शब्देन समुच्चयात् न न्यूनपदतादोषोऽपीति सुधीभिर्विभावनीयम्।

"वस्तुस्वरूपावधारणं विद्यामाहु"रिति वेदान्तभाष्ये भगवच्छङ्कराचार्य्याः।

"ब्रह्मैव वस्त्वि"ति वेदान्तसारः।

शार्दूलविक्रीडितं वृत्तम् ॥५॥

(ल) नेपथ्य इति। इत इतः अस्मिन्नस्मिन् पथि, भगवतीमहादेव्यौ आगच्छतामिति शेषः। कञ्चुकिन उक्तिरियम्।

(व) जनेति। अये इति विषादसूचकमव्ययं शब्दकल्पद्रुमे द्रष्टव्यम्। गृष्टिना तदाख्येन कञ्चुकिना उपदिश्यमानः निर्दिश्यमानो मार्गः पन्था यस्याः सा। निरूप्य विशेषेणावलोक्य। इयं दृश्यमाना सैव पूर्वदृष्टा कौशल्येव इत्येवं को जनः प्रत्येति

---

(१) धर्म्मदारा इति पाठान्तरम्।

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा ।
कष्टं बतान्यदिव दैववशेन जाता ।
दुःखात्मकं किमपि भूतमहो विपाकः ॥६॥

विश्वसिति, अपि तु कोऽपि नेत्यर्थः । नानाविधदारुणशोकेन जरसा च अतीवविकृताकृति-त्वादिति भावः ।

धर्मस्य पत्नी धर्मपत्नी अश्वघासादिवत् षष्ठीसमासः ।

आसीदिति । इयं दृश्यमाना कौशल्या दशरथस्य गृहे श्रीः राजलक्ष्मीर्यथा तथा आसीत्, राजलक्ष्मीवत् असाधारणकान्तिपरमसमादरादिविशिष्टा आसीदित्यर्थः । वा अथवा उपमानपदेन सादृश्यवाचकतया भेदबोधकेन यथाशब्देनेत्यर्थः किं किं प्रयोजनम् अपि तु किमपि नेत्यर्थः कथमित्याह, एषा कौशल्या सा श्रीरेव राजलक्ष्मीरेव आसीदित्यर्थः । सुतरां अनया सार्धं राजलक्ष्म्या अभेदात् भेदे प्रसक्तायाः उपमाया नास्त्यवकाश इति भावः । बत खेदे । कष्टं दुःखम् । दैववशेन दुरदृष्टवशेन दुःखमात्मा स्वभावो यस्य तत् दुःखात्मकं दुःखस्वरूपमित्यर्थः किमपि अनिर्वचनीयमित्यर्थः अन्यत् लोकविलक्षणं भूतं कोपि जन्तुरिव जाता अहो विपाकः आश्चर्यः परिणाम इत्यर्थः । यस्मादियमविकलराजलक्ष्मीरूपापीदानीमतीवविकृताकृतिः परिचेतुमप्यशक्या जाता, तत एव जीवानां परिणामो विस्मयकार एवेति भावः ।

अत्र प्रथमचरणे श्रौती उपमा, द्वितीयचरणे भेदे अभेदाध्यवसायमूला अतिशयोक्तिः, द्वितीयार्द्धे च भावाभिमानिनो वाच्या इव्योत्प्रेक्षा, इत्येतेषां परस्परं नैरपेक्ष्य-स्थितेः संसृष्टिः ।

"आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म" चेत्यमरः । 'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबे त्रिषूचिते' इत्यादि मेदिनी

तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमुपमानत्वमिति लक्षणादुपमानोपमेययोर्भेद आवश्यकः । विधेयप्राधान्येऽपि 'उद्देश्यविधेययोरुद्देश्यवचनत्वमाख्यातस्ये'ति काशिका-प्रामाण्यात् जातेत्यस्य स्त्रीत्वम् । तत्र आख्यातस्य प्रधानक्रियाया अर्थः ।

अयमपरः पापो(१) दशाविपर्यासः । (अ)
य एव मे जनः पूर्वमासीन्मूर्त्तो महोत्सवः ।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम् ॥७॥

ततः प्रविशति अरुन्धती कौशल्या कञ्चुकी च ।

अरु । ननु ब्रवीमि, द्रष्टव्यः स्वयमुपेत्य वैदेह्या इत्येष वः

वसन्ततिलका वृत्तम् ॥६॥

(अ) अयमिति । अयम् उपस्थितः कौशल्यासाक्षात्काररूपः, अपरः अन्यः, पापः पापजनितः दशाविपर्यासः अवस्थापरिवृत्तिः । जातो ममेति शेषः । सीतया सह, चिरविच्छेदे सति एका चिरशोकात्मरूपा दशापरिवृत्तिरासीत्, इयञ्च द्वितीया कौशल्यया सह साक्षात्कारे सति सौभाग्यानुवाद-परस्परालापसंवादादिरूपा महादुःखजनिका पापजनिता जाता, पापं विना दुःखासम्भवादिति भावः ।

दशाविपर्यासं व्यनक्ति य एवेति । य एव कौशल्यालक्षणो जनः पूर्वं सीताविवाहानन्तरं दशरथजीवनसमये मे मम मूर्त्तो मूर्त्तिमान् महोत्सवः परमामोदकारणमासीत्, सीताया विवाहात् परं दशरथजीवितकाले यां दृष्ट्वा महान्तमानन्दमनुभूतवानस्म्यहम्, इदानीं तस्यैव जनस्य दर्शनं साक्षात्कारः क्षते देहस्य छिन्नस्थाने विदीर्णव्रणादौ वा क्षारं क्षारसंयोगः लवणादिक्षारवस्तुसंयोग इव असह्यं सोढुमशक्यं जातं सञ्जातं सकलशोकोद्दीपकत्वादिति भावः ।

या पूर्वं सुखकारणमासीत्, इदानीं सैव दुःखकारणमिति दशाविपर्यास इति च भावः ।

अत्र प्रथमार्द्धे हेतुनामालङ्कारः द्वितीयार्द्धे चोपमा, इत्युभयोर्निरपेक्षा- स्थितिः संसृष्टिः ।

(ब) अरु इति । नन्विति कौशल्यासम्बोधनम् । स्वयमात्मना उपेत्य समीपं

---

(१) अयमपरश्चाय इति, अयमपरः प्राप्त इति च पाठान्तरम् ।

कुलगुरोरादेशः ; अत एवाहं प्रेषिता; ततः कोऽयं पदे पदे महाननध्यवसायः । (१) (ग)

अरु । देवि ! संस्तम्भयात्मानम्, अनुरुध्यस्व भगवतो वशिष्ठस्यादेशमिति विज्ञापयामि । (ख)

कौश । ईदिसे काले मिहिलाधिवो दट्ठव्वोत्ति समं ज्जेव सव्वाइं दुक्खाइं समुब्भवन्ति । ण सक्कणोमि उव्वत्तमाण-मुलबन्धणं (२) हिअअं अवत्थाविदुं । (ङ)

(ङ) ईदृशे काले मिथिलाधिपो द्रष्टव्य इति सममेव सर्वाणि दुःखानि समुद्भवन्ति । न शक्नोमि उद्वर्तमानमूलबन्धनं हृदयमवस्थापयितुम् ।

गत्वा वैदेहः विदेहदेशाधिपतिर्जनकः । यो युष्माकं कुलगुरोर्वशिष्ठस्य । अत एव त्वया स्वयमुपेत्य द्रष्टव्यत्वादेव, अहं प्रेषिता प्रेरिता युष्मत्कुलगुरुणेति शेषः । एता-किन्यास्तव गमनस्यासम्भवात् अभीप्सिताय त्वत्सहचारित्वोक्तरक्षाय अहं प्रेषितेति भावः । ततश्चास्य गुरोरादेशस्यावश्यपालनीयत्वादित्यर्थः पदे पदे प्रतिपदेऽपि कोऽयं किंहेतुक इत्यर्थः, महाननध्यवसायः अतीवावस्थानोद्यमः, एकैकपदं गत्वैव तव स्थित्यपेक्षणादिना अव स्थितिप्रयत्नः कार्यमित्यर्थः । अथ तत् गत्वा वैदेहं न द्रक्ष्यसि तदा स कुलगुरुर्विरक्तो भविष्यतीति भावः ।

ननु प्रयोगोऽयं न 'द्रष्टव्य' इत्यादिवाक्यं पूर्वमपि विशिष्टत्वमिति प्रतीयते ।

(ख) अरु इति । आत्मानं हृदयं संस्तम्भय स्थिरीकुरु । अनुरुध्यस्व अनुसर प्रतिपालयेत्यर्थः ।

(ङ) कौशेति । ईदृशे काले सर्वसन्ध्य- सीता-विरहविच्छेदाभ्यां दारुणीभूत-समये । सममेव समानमेव युगपदित्यर्थः सर्वाणि दुःखानि सर्वसम्भवीतानि वाञ्छन-रामादिवियोगजनितानि कष्टानि समुद्भवन्ति चित्ते आविर्भवन्ति । अतएव उद्वर्तमानं

---

(१) महाननध्यवसाय इति पाठान्तरम् । उग्घट्टमाणेति पाठान्तरम् ।

जन। अत्र कः सन्देहः। (च)

सन्तानवाहीन्यपि मानुषाणां
दुःखानि सद्बन्धुवियोगजानि।
दृष्टे जने प्रेयसि दुःसहानि
स्रोतःसहस्रैरिव संप्लवन्ते ॥८॥

उन्मिषत् तत् सर्वं दुःखं छिन्नप्रायमित्यर्थः। मूलबन्धनं यथास्थानस्थितिकारकप्रलतबन्धनं यस्य तत् तथोक्तं हृदयं अवस्थापयितुम् स्थिरीकर्तुं न शक्नोमि। अत एव नितान्ताकुलतया तत्र तत्र स्थातुं मे महान् अध्यवसाय इति भावः।

"समं सर्वं समानयो"रित्यमरः। सममिति उद्वमन्तिक्रियाविशेषणम्।

(च) अत्र इति। अत्र जनकदर्शनेन सर्वदुःखाविर्भावविषये।

तत्र सन्देहाभावं समर्थयति सन्तानेति। मानुषाणां सन्तानेन धारया वहन्तीति सन्तानवाहीनि निरवच्छिन्नानीत्यर्थः: सताम् उत्कृष्टानां बन्धूनाम् अतीवस्नेहास्पदानां पुत्रकन्यादीनां वियोगात् विच्छेदात् जायन्त इति सद्बन्धुवियोगजानि दुःखानि, प्रेयसि जने प्रियतमे कस्मिंश्चित् जने दृष्टे सति दुःसहानि असह्यानि सन्ति स्रोतःसहस्रैरिव असंख्यप्रवाहैरिव संप्लवन्ते उच्छलन्ति। अतस्त्वया यदुक्तं सममित्यादि तत् सत्यमेवेति भावः।

अत्र भावाभिमानिनी वाच्या क्रियोत्प्रेक्षाऽलङ्कारः, तेन च चन्द्रोदये समुद्रजलानां वेल्युपमा व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः। तथा समुच्चयप्रयोजनाभावेऽपि अपिशब्दप्रयोगादधिकपदत्वदोषः, स च 'सन्तानवाहीनि मनुजाना'मिति पाठेन समाधेयः।

दुष्टबन्धुविच्छेदे दुःखमेव न भवतीति सत्पदमुपात्तम्।

कुमारसम्भवे एतदनुरूपोक्तिर्यथा "स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते" इति।

इन्द्रवज्रा वृत्तम् ॥८॥

कौश। कहं वच्छाए वहुए एवं गदे तस्स राएसिणो मुहं दंसम्ह। (क)

अरु। एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्म पारायणं जगौ ॥८॥

कौश। एसो सो महाराअस्स हिअआणन्दो वच्छाए वहुए पिदा राएसी। हद्दी हद्दी, सम्भाविदम्हि अणुवट्ठिदमङ्गलवे दिअसे, हा देव्व! सव्वं एव्व तं णत्थि। (ख)

(क) कथं वत्साया वध्वा एवं गते तस्य राजर्षेर्मुखं दर्शयाम:।

(ख) एष स महाराजस्य हृदयानन्दो वत्साया वध्वाः पिता राजर्षिः। हा धिक् हा धिक्, सम्भाविताऽस्मि अनुपस्थितमङ्गलं सर्वं दिवसे; हा दैव! सर्वमेव तत् नास्ति।

(क) कौशेति। वध्वाः सीतायाः। एवं गते एवम्प्रकारे दारुणे अवस्थाविवर्त्तने जाते सतीत्यर्थः। तस्य राजर्षेर्जनकस्य, सम्बन्धविवक्षया षष्ठी, तेन राजर्षिं प्रत्यर्थः। अकारणसीतापरित्यागकारिणो रामस्य मातृत्वसम्बन्धात् जनकेन मुखं दर्शयितुं ममापि महदप्रतिभत्वं जायत इति भावः।

एष इति। एषः सम्मुखवर्त्ती वो युष्माकं श्लाघ्य आदरणीयः सम्बन्धी वैवाहिकः, जनकानां जनकवंशीयानां कुलोद्वहो कुलधुरन्धरो वर्त्तत इति शेषः। याज्ञवल्क्यो मुनिः यस्मै जनकाय पारायणं सकलं ब्रह्म वेदं जगौ गीतवान्। याज्ञवल्क्यो यं राजानं समग्रं वेदमध्यापयामासेत्यर्थः।

पारं समाप्तिं अयते गच्छति प्राप्नोतीति पारायणं नन्द्यादित्वात्।

"वेदस्तत्त्वं तपो ब्रह्म" 'साकल्यासङ्गवचने पारायणपरायणे' इति चामरः ॥८॥

(ख) कौशेति। महाराजस्य दशरथस्य, हृदयं आनन्दयतीति हृदयानन्दः। वध्वाः सीतायाः। न उपस्थितः सहीत मव: प्रचुरानन्दो यस्मिन् स तथोक्तस्तस्मिन्

जनकः। (उपसृत्य।) भगवत्यरुन्धति! वैदेहः सीरध्वजोऽभिवादयते। (ग)

यया पूतम्मन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः।
त्रिलोकीमङ्गल्यामवनितललोलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥१०॥

दिवसे सुखाविताखि समाहताखि जनकराजेन दर्शनदानादिति शेषः। दुःखशमने महोत्सवोपयुक्तजनदर्शनं प्रत्युत महादुःखकरमेवेति भावः। हा दैव षडह! तत् महोत्सवप्रयोजकं सर्वमेव वस्त्वित्यर्थः नास्ति। महाराजः, सीता, तत्सन्तानश्चैते न सन्त्येव; शोककातरा रामादयोऽपि दूरे वर्त्तन्ते अरुन्धत्यप्येवं दशामापन्ना; सुतरां महोत्सवस्य किमपि नास्तीत्यर्थः।

(ग) जनक इति। वैदेहः विदेहदेशीयः, सीरो हलं ध्वजे ध्वजदण्डे यस्य सः; सीरध्वजनामेत्यर्थः; अभिवादयते प्रणमति, भवतीमिति शेषः। 'सीरोऽर्कहलयोः पुंसि' इति मेदिनी।

अभिवाद्यतायाः कारणमाह ययेति। पूर्वेषां पूर्ववर्त्तिनां गुरूणामपि [illegible]कतया सर्वपूज्यानामपि मरीच्यादिदेवर्षीणां मध्ये गुरुतमः प्रधानतमः प्रकृष्टो गुरुरित्यर्थः, तथा पवित्रस्य स्वतः पवित्रस्येत्यर्थः महसो ब्रह्मतेजसः निधिरपि आश्रयोऽपि ते तव पतिर्भर्त्ता वशिष्ठः, यया त्वया पूतम्मन्यः आत्मानं पवित्रं मन्यते। अवनितललोलेन भूतलचलितेन भूमिस्पर्शिनेति यावत् शिरसा मस्तकेन त्रिलोकीमङ्गल्यां त्रिभुवनकल्याणकारिणीं जगद्वन्द्यां सर्वपूज्यां देवीमुषसमिव उषाकालाधिष्ठात्रीं देवतामिव भगवतीं भवतीं वन्दे प्रणमामि।

अत्र पूर्णोपमाऽलङ्कारः।

"[illegible]"। 'प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि' इति अमरः।

अरु । परं ज्योतिस्ते प्रकाशताम्, अयं स त्वां पुनातु देवः परोरजाः, (१) य एष तपति । (घ)

पूतमात्मानं मन्यत इति पूतमन्यः, "खश् चात्मने" इति मन्यतेः खश् "अरुर्द्विषदजन्तस्य मुम्" इति मुमागमः । त्रयाणां लोकानां समाहार इति त्रिलोकी द्विगोर्ङीप्, अदन्तत्वात् ङीप्रत्ययः ।

साध्वी भर्तारं पुनातीत्याह अङ्गिराः—

"ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः ।
तं वै पुनाति सा नारीत्याङ्गिरसभाषितम् ।"

साध्व्याः पूज्यत्वमाह मत्स्यपुराणम्—

"तस्मात् साध्व्यः स्त्रियः पूज्याः सततं देववज्जनैः ।
तासां राज्ञा प्रसादेन धार्य्यते च जगत्त्रयम् ॥

शिखरिणी वृत्तम् । ॥ १० ॥

(घ) अरु इति । परं ज्योतिः सर्वप्रधानं तेजः परं ब्रह्मेत्यर्थः ते तव प्रकाशताम् परमात्मसाक्षात्कारस्तव भवत्वित्यर्थः । तथा रजसो रजोगुणात् परं परवर्त्ती एव सर्वलोकप्रत्यक्षगोचरः यस्तपति तापदानं करोति, अयं स देवः आदित्यः त्वां पुनातु पवित्रीकरोतु । इत्याशीर्वादद्वयम् । परोरजा इति "अपस्करादयश्चे" ति ससुट् निपातः ।

अत्र परज्योतिःशब्देन परं ब्रह्म बोध्यते । तथाच श्रुतिः "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । अत्र वेदान्तसूत्रं "ज्योतिर्दर्शना" दिति । तत्र शाङ्करभाष्यं "परमेव ब्रह्म ज्योतिःशब्द" मिति । (१ अ, ३ पा, ४० सू)

य एष तपतीत्यनेनादित्योऽभिप्रेतः । तथाच छान्दोग्योपनिषत् "य एवासौ तपति तमुद्गीथमुपासीत"।

---

(१) परोरजसामिति पाठान्तरम् ।

जन । आर्य्ये गृष्टे ! अपि कुशलमस्याः प्रजापालमातुः ? । (ङ)

कञ्चुकी । स्वगतम् । * निर्विशेषमतिनिष्ठुरमुपालब्धाः स्मः ।

प्रकाशम् । राजर्षे ! अनेनैव मन्युना चिरपरित्यक्तरामभद्रमुखचन्द्रदर्शना नार्हसि त्वं दुःखयितुमतिदुःखितां देवीम् ।

अत रजःपदं तमसोऽप्युपलक्षणं तेन रजस्तमोभ्यामस्पृष्टः केवलसत्त्वमय इत्यर्थः । सर्वप्रकाशकत्वात् । तथाच सांख्यकारिका—

"सत्त्वं लघु प्रकाशकमिष्टमित्यादि ।

(ङ) जनेति । गृष्टिरिति कञ्चुकिनो नाम तत्सम्बोधनं गृष्ट इति । अपिशब्दः प्रश्ने । प्रजापालमातुः कौशल्यायाः, कुशलं वर्त्तते किमित्यर्थः । यः खलु यथार्थत्वमयथार्थत्वं वा अपराधमनपराधं वा न्याय्यत्वमन्याय्यत्वं वा अविवेच्य कर्म्म कुरुते स सर्वैरेवाश्लाघ्यते । तथाच रामभद्रः स्वल्पदूरदर्शिनीनां साधारणप्रजानामयथार्थापवादेन निरपराधां सीतामन्याय्यभावेन केवलप्रजारञ्जनाय निर्वासितवानिति नितान्ततरलस्वभावताप्रकाशादश्लाघ्य इति भावः । एतेन रामं कौशल्याञ्च प्रति जनकस्य महान् विरागो व्यज्यत इति वस्तुना वस्तुध्वनिः ।

(च) कञ्चुकीति । निर्न विद्यते विशेषो यस्मात् तन्निर्विशेषं निरतिशयं अतिनिष्ठुरं नितान्तपरुषञ्च यथा स्यात्तथा उपालब्धाः तिरस्कृताः स्मः वयमिति शेषः । निःसङ्कोचालापकारिणीं कौशल्यां प्रति पूर्वमिव 'प्रियसखि ! अपि कुशलं ते' इत्येवं साक्षादपृष्ट्वा मम समीपे वैवाहिकीति सम्बन्धबोधकपदाप्रयोगात् प्रजापालमातुरिति कौलुष्ठ्यनपदप्रयोगाच्चेति भावः ।

अनेनैव सीतानिर्वासनजनितेनैव मन्युना क्रोधेन चिरं परित्यक्तं रामभद्रस्य मुखचन्द्रदर्शनं यया तां तथोक्ताम् । अतिदुःखितां सीतानिर्वासनेनैव निरतिशयदुःखभागिनीमित्यर्थः दुःखयितुं पुनः क्लिष्टां कर्त्तुं । देवीं कौशल्यां । सीतानिर्वासनेनैव सन्तापेन स्वयमपि रामं प्रति नितान्तकुपिता सतो परमस्नेहवशादविरतदृष्टपूर्वमपि

---

* निरवशेषमिति पाठान्तरम् ।

रामभद्रस्यापि* दैवदुर्नियोगः कोऽपि, यत् किल समन्तात्प्रवृत्त-बीभत्सकिंवदन्तीकाः पौरजानपदा नाग्निपरिशुद्धिमप्यल्पकाः प्रतियन्ति, इत्यतो दारुणमनुष्ठितम् । (च)

जन । आः ! कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने । कष्टम्, एवंवादिना जनेन रामपरिभूता अपि वयं पुनः परिभूयामहे । (छ)

रामभद्रमुखचन्द्रमिदानीं नावलोकयति परमदुःखिता च जातेति रामविद्वेषे भवत्पक्षपातिनी, सुतरां देवीं प्रति ईदृशवाक्यप्रयोगस्ते न युक्तिसङ्गत इति भावः ।

तर्हि राम एव तिरस्कारणीय इत्याह रामभद्रस्यापीति । कोऽपि अनिर्वचनीयः दैवदुर्नियोगः दुरदृष्टक्रतमेरणं, यत् यस्मात् दैवदुर्नियोगादित्यर्थः । समन्तात् सर्वासु दिक्षु प्रवृत्ता उपस्थिताः, बीभत्सा निन्दिताः किंवदन्त्यः "निःसङ्गाया सीता वत्सरप्रायं यावत् लङ्कायां स्थिता तथापि अवाधेनः सा पुनर्गृहीता" इत्येवं अपवादा येभ्य स्ते तथोक्ताः, अत एव अल्पकाः अनिश्चितहेतुकपरापवादकारित्वात् क्षुद्राशयाः पौरजानपदाः पुरवासिनो देशवासिनश्च जनाः अग्निपरिशुद्धिमपि अग्निपरीक्षया प्रमाणितनिर्दोषत्वमपि न प्रतियन्ति न विश्वसन्ति, सीताया अग्निपरोक्षया प्रतिपादितं निर्दोषत्वं प्रत्यक्षोऽपि न विश्वसन्तः, केवलं निन्दन्तीत्यर्थः । इति वाक्यसमाप्ती । अतः कारणात् दारुणं निर्वासनरूपं भयङ्करं कर्म अनुष्ठितं कृतं रामभद्रेणेति शेषः । अस्मिन् निर्वासने रामस्य विरागो विद्वेषो वा न कारणं किन्तु दुर्दैवमेवेति निर्दोषो रामोऽपि न निन्दनीय इति भावः ।

(छ) जनेति । आ इति कोपसूचकमव्ययम् । अस्मत्प्रसूतेः मम तनयायाः सीतायाः परिशोधने पवित्रताकरणे अयं त्वया उच्यमानः अग्निर्नाम अग्निरिति प्रसिद्धः पदार्थः कः, अपि तु कोऽपि नेत्यर्थः । पवित्रताविषये सीतातः अग्निर्न्यून एवेति भावः । एवं "अग्नौ सीतायाः शुद्धि" रिति वाक्यं वदति यः स एवंवादी तेन, जनेन कष्टं कि-

---

* रामभद्रेणापि समन्तात् प्रवर्त्तितबीभत्सकिंवदन्तीकाः···दारुणमनुष्ठितमिति पाठान्तरम् ।

अरु। निःश्वस्य। एवमेतत्, अग्निरिति वत्सां प्रति परिलघून्यक्षराणि, सीतेत्येव पर्याप्तम्। हा वत्से! (ज)

शिशुर्वा शिष्या वा यदसि, मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढ़यति।
शिशुत्वं स्त्रैणं वा भवतु, ननु वन्द्यासि जगतो
गुणाः पूजास्थानं, गुणिषु न च लिङ्गं न च वयः ॥११॥

प्रभृतिना लोकेन, रामेण परिभूताः चरित्रदोषापवादेन सीताया निर्वासनात् तिरस्कृता अपि वयं पुनः परिभूयामहे तिरस्कृताः स्मः। दुष्टसम्पर्केण निर्दोषस्यापि दोषः स्यादिति रामेण चरित्रदोषापवादेन सीताया निर्वासनात् तस्य जनकतया वयमप्यवमानिताः, परञ्च तस्या अग्निशुद्धिं वदता जनेन स दोषोऽदृढीकृत इति पुनरप्यवमानिता इति भावः।

"प्रसूतिः।···दुहिते" ति शब्दकल्पद्रुमः।

अरु इति। एतत् त्वयोक्तं कोऽयमित्यादिवाक्यम्, एवं सत्यमित्यर्थः। स्वयमपि तद्वाक्यस्य सत्यत्वं प्रतिपादयति अग्निरिति। वत्सां प्रति सीताविषये अग्निरिति अक्षराणि "अग्नि" इत्यानुपूर्वीका वर्णाः परिलघूनि न्यूनानि। सीतया सह पवित्रतायां अग्रेस्तुलनायां क्रियमाणायां पातिव्रत्यधर्म्मेण सीतैव विशिष्यते इत्यर्थः। अक्षरशब्दस्य तत्प्रतिपाद्यार्थे लक्षणा। सीतेत्येव सीता इति नामैव, पर्याप्तं यथेष्टम्। सीताया एतावान् चरित्रोत्कर्षो जगत्यां प्रथितः, यत् सीतानामोच्चारणमात्रेणैव सर्वेषां हृदये तस्या लोकोत्तरा पवित्रताविर्भवतीति तत्प्रतिपादने अग्निर्न समर्थ इति भावः।

"कामं प्रकामं पर्य्याप्तं निकामेष्टं यथेप्सित" मित्यमरः।

शिशुरिति। हा वत्से! मम समीपे त्वं शिशुः वयोऽल्पत्ववशात् बालिका वा, शिष्या पातिव्रत्यधर्म्मोपदेशादिना शिक्षणीया वा असि भवसि इति यत् तत् शिशुत्वं शिष्यात्वं वा पितृत्वं शिष्यत्वं वेत्यर्थः तथा तेनैव प्रकारेण तिष्ठतु त्वया सार्द्धं मे वहिर्व्यवहारः शिशुभावेन शिष्याभावेन च भवतु इत्यर्थः, तु किन्तु विशुद्धेः प्रकिमतावा

कौश। अम्मो उम्मीलन्ति वेअणाओ। इति मूर्च्छति। (भ)

जन। हा कष्टं! किमेतत्। (ञ)

(भ) अहो उन्मीलन्ति वेदनाः।

उत्कर्षः उत्कृष्टता त्वयि मम भक्तिं पूज्यत्वं नानुरागं द्रढयति दृढीकरोति " प्रथम- मेवालौकिकसौन्दर्य्यादिदर्शनात् देवांशज्ञानेन सामान्यतो भक्तिर्जाता इदानीन्तु परिवोत्- कर्षस्तां दृढीकरोतीत्यर्थः। न केवलं मम अपि तु सर्वेषामेव त्वयि भक्तिर्जायते इत्याह शिशुत्वमित्यादि। शिशुत्वम् अल्पवयस्कत्वं स्त्रैणं वा भवतु तवेति शेषः, तथापि जगतो जगज्जनस्य वन्द्या ननु, भक्त्या पूजनीयैव असि भवसि। ननु बालिका स्त्री कथं सर्वेषां पूजनीया स्यादित्याह गुणा इत्यादि। गुणाः धर्मपातिव्रात्यसच्चरित्रादयः पूजायाः स्थानम् आस्पदं प्रयोजको हेतुरित्यर्थः, गुणिषु तादृशगुणवत्सु जनेषु लिङ्गं स्त्रीत्वपुंस्त्वादिकं न च पूजास्थानं न वा वयो जीवनकालश्च अल्पवयस्त्वं प्रवयस्त्वं वेत्यर्थः पूजास्थानम्। सुतरां त्वं पातिव्रत्यादिगुणेनैव पूज्यासीति भावः

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः तथा " नच लिङ्गं नच वय" इत्यनेन लिङ्गवयसोः पूजाकारणतानिरासात् शाब्दी परिसंख्या च इत्यनयोरङ्गाङ्गि- भावेन सङ्करः।

यदिति तदिति च क्रियाविशेषणम्। दृढं करोतीति इति " रऋच्छ्वतो लघोर्व्य- ञ्जनादे" रिति ऋकारस्य रत्वम्। स्त्रिया भाव इति स्त्रैणम् " स्त्रीपुंभ्यां नञ् स्नञौ" इति नञ् प्रत्ययः। ननुशब्दोऽवधारणे।

चकारद्वयं प्रत्येकप्राधान्यसूचनार्थम्।

शिखरिणी वृत्तम्॥ ११॥

(भ) कौशेति। वेदनाः शोकजनितदुःखव्यथाः उन्मीलन्ति प्रादुर्भवन्ति नवी- भवन्तीत्यर्थः सीताया अशेषगुणानुवादश्रवणादिति भावः।

(ञ) जनेति। एतत् कौशल्याया मूर्च्छापन्नत्वं किं किम् कारणम्।

(र कि। इति बङ्गभाषा)।

अरु। राजर्षे! किमन्यत्। (ट)

स राजा तत् सौख्यं स च शिशुजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम्।
विपाके घोरेऽस्मिन्नथ (१) खलु विमूढ़ा तव सखी,
पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति॥ १२॥

(ट) अरु इति। अन्यत् अन्यप्रकारं किम् अपितु किमपि नान्यप्रकारमित्यर्थः। तथाच मूर्च्छितेयं मा प्रकारमापन्नेति भावः। (आर किं? इति भङ्गभाषा)।

सकारणां तामेवाह स राजेति। सुहृदि प्रियसखे त्वयि दृष्टे सति स राजा दशरथः, तत् सौख्यं तत्कालीनसुखसन्तानः, स च शिशुजनः सीतारामचन्द्रादिः, ते दिवसाश्च अनुभूतपूर्वाणि सुखकराणि दिनानि, तदेतत् अखिलं दशरथादिसमस्तं स्मृतौ आविर्भूतं स्मृतिपथारूढ़म्। अथ अनन्तरम् अस्मिन् अनुभूयमाने घोरे विपाके अवस्था-विपर्य्यये स्मृतावाविर्भूते सतीत्यर्थः तत्कालीनावस्थया सह इदानीन्तनावस्थायाः पर्य्यालोचनयेत्यर्थः तव सखी कौशल्या विमूढ़ा मूर्च्छापन्ना। ननूभयोरवस्थयोः स्मरण-मात्रेण कथं मूर्च्छा स्यादित्याह पुरन्ध्रीणामित्यादि। हि यस्मात् पुरन्ध्रीणां पतिपुत्रादि-मतीनां कुलस्त्रीणां चित्तं मनः कुसुमसुकुमारं पुष्पवत् कोमलं तीव्रदुःखासहिष्णु इत्यर्थः भवति। अतएवोभयोरवस्थयोः स्मरणेनैव मूर्च्छितेति भावः।

अत्रापि सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, कुसुमसुकुमारमिति लुप्तोपमया सङ्कीर्णः।

सुखमेव सौख्यं स्वार्थे ष्यञ्। तदिति "नपुंसकानपुंसकयोर्नपुंएकमेक-वद्वा" इति नपुंसकत्वम् एकवचनञ्च।

"पुरन्ध्री। पतिपुत्रदुहित्रादिमती" इति शब्दकल्पद्रुमः।

शिखरिणी वृत्तम्॥ १२॥

---

(१) नद्व खलु इति पाठान्तरम्।

जन। हन्त हन्त! (१) सर्वथा नृशंसोऽस्मि संवृत्तः (२) यश्चिरस्य दृष्टान् प्रियसुहृदः प्रियान् दारान् न स्निग्धं पश्यामि। (ठ)

स सम्बन्धी श्लाघ्यः, प्रियसुहृदसौ, तच्च हृदयं
स चानन्दः साक्षादपि च निखिलं जीवितफलम्। (३)
शरीरं, जीवो वा, यदधिकमतो वा प्रियतमो
महाराजः श्रीमान् किमिव मम नासीद्दशरथः॥ १३॥

(ठ) जनेति। हन्तेति विषादसूचकमव्ययं दिवं चनच विषादे। नृशंसः निष्ठुरः। चिरस्य दृष्टान् बहुपूर्वं दृष्टानित्यर्थः, प्रियसुहृदः दशरथस्य, दारान् भार्यां, स्निग्धं सस्नेहम्। यो बन्धुजनं सर्वथा सस्नेहं नावलोकयति स निष्ठुर एवेति भावः।

स इत्यादि। स दशरथः श्लाघ्यः अतीवसद्वंशजातत्वात् प्रशस्यः सम्बन्धी वैवाहिकः, असौ दशरथः प्रियसुहृत् परमप्रणयास्पदं सखा, तच्च स च दशरथः हृदयं हृदयरूपप्रीतिभाजनं स च दशरथः साक्षात् चाक्षुषप्रत्यक्षविषयः मूर्त्तिमानित्यर्थः आनन्दः आमोदः, अपिच अन्यच्च दशरथः निखिलं समस्तं जीवितस्य मम प्राणधारणस्य फलं दुःखमिव सर्वेषां जीवनस्य सर्वदाभीष्टतया वास्तविकं फलं निरतिशयमनोज्ञत्वात् तच्च दशरथ आसीदित्यर्थः तथा दशरथः शरीरं सुस्थत्वे कार्य्यसम्पादनात् असुस्थत्वे च कार्य्यहानेः मम गात्रस्वरूपः तथा दशरथः जीवः अतीवप्रियत्वात् मम जीवात्मा अहङ्कारविशिष्टं चैतन्यमित्यर्थः वा अथवा अतः एभ्यो हृदयादिभ्यो यत् वस्तु अधिकं प्रियत्वेन।तिरिक्तं जगत्यामस्तीति शेषः तादृशोऽपि प्रियतमः दशरथः आसीदिति सर्वत्रान्वयः। अतएव श्रीमान् राजलक्ष्मीवान् महाराजो दशरथः मम किमिव नासीत् अपितु सर्वमेवासीदित्यर्थः। दशरथमयं मे जीवनमासीदिति भावः।

---

(१) कष्टमिति पाठान्तरम्।

(२) अन्यपुस्तके संवृत्त इति पाठो नास्ति।

(३) जीवितपदमिति पाठभेदः।

कष्टम्, इयमपि सा कौशल्या ।

यदस्याः पत्युर्वा रहसि परमं दूषितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः ।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत् स्मृत्वा दहति यदवस्कन्द्य हृदयम् ॥१४॥

अथ आनन्दस्य चाक्षुषप्रत्यक्षविषयत्वासम्बन्धे ऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः, तथा दशरथे हृदयत्वजीवितफलत्वशरीरत्वजीवत्वानामारोपात् निरङ्गं मालारूपकं तथा हृदयादिभ्योऽधिकप्रियवस्तुनोऽसम्बन्धे ऽपि तत्सम्बन्धोक्तेरपरातिशयोक्तिः तथा चतुर्थ-चरणगततवाक्यार्थं प्रति प्राथमिकचरणत्रयगतवाक्यार्थानां हेतुत्वात् काव्यलिङ्गम् अर्थापत्तिश्चेति, एतेषामङ्गाङ्गिभावेन सङ्करः ।

"य आधारस्तदधिकरण" मित्यादिवत् तर्श्येति प्रकृतसमानलिङ्गत्वेन हृदय-विशेषणत्वात् नपुंसकम् । इवशब्दो वाक्यालङ्कारे ।

"साक्षात् प्रत्यक्षतुल्ययो" रित्यमरः ।

अहङ्कारविशिष्टपुरुषस्य जीवत्वमाह सांख्यसूत्रम् ।

"विशिष्टस्य जीवत्वमन्वयव्यतिरेका" दिति (सा ६ अ ६३ सू) "जीवत्वं प्राणित्वं तच्चाहङ्कारविशिष्टपुरुषस्य धर्मो" इति तद्भाष्यञ्च ।

शिखरिणी वृत्तम् ॥१३॥

यदस्या इति । अस्याः कौशल्यायाः, पत्युर्वा अस्या एव भर्तुर्दशरथस्य वा रहसि निर्जनस्थाने यत् परमं दूषितम् अत्यन्तं दूषणं प्रणयकलह इति यावत् अभूत्, तदर्थमहं दम्पत्योः उभयोरेव जायापत्योः पृथक् स्वतन्त्रं यथा स्यात्तथा उपालम्भस्य तिरस्कारस्य विषयः पात्रम् अभूवम् । तव सखा मा प्रतीदृशमनगाख्यमाचरितवान् तथापि त्वमुदासीन इति कीदृशो लोकस्त्वं यन्नैनं शिक्षयसि इत्थं कौशल्या मामुपालब्धवती । तथा तव सखी नितरामनगाख्यकारिणी इत्यवगच्छन्नपि उपेक्षमाणो भवानावयोः कलहं कौतुकमिव मनुते किम् इत्थं दशरथोपि मामुपालब्धवानित्यर्थः । तदनु तदनन्तरं प्रसादे उभयोर्मनोमालिन्यदूरीकरणे कोपे वा क्रोधोत्पादने वा मदधीनो ममायत्तो विधि

अरु। हा कष्टम्! अतिचिरनिरुद्धनिश्वासनिष्ठुरं हृदय-
मस्याः। (ड)

जन। हा प्रियसखि!। कमण्डलूदकेन सिञ्चति।(१) (ढ)

कञ्चु। सुहृदिव प्रकटय्य सुखप्रदः
प्रथममेकरसामनुकूलताम्।

र्व्यवस्था अभूत्। दम्पती परस्परं प्रति प्रसादयितुं कोपयितुं वा अहमेव समर्थोऽभव-मित्यर्थः। अतएवाहमुभयोरपि परमविश्वस्तबन्धुरासमिति भावः। वा अथवा तत् स्मृतं तां घटनावलीमित्यर्थः स्मृत्वा अलं तत्स्मरणेन नास्ति प्रयोजनमित्यर्थः। यत् घटनावृन्दं स्मृतं सदिति शेषः हृदयम् अवस्कन्द्य आक्रम्य दहति शोकरूपेण परिणतं सत् सन्तापयति। पूर्वघटनावलीनां स्मरणेन केवलं हृदयं शोकातुरमेव भवति, नतु खल्विदानीं किमपि अन्यत् फलमस्तीति निष्कर्षः।

अत्र दम्पत्योनिष्ठदूरवणरूपकारणात् जनकस्योपालम्भरूपकार्य्योत्पत्तेः असङ्गति-रलङ्कारः।

प्रथमं वाच्यं सम्मुखे। तथाच "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वः। ".वविक्तविजनच्छन्ननिःशलाकास्तथा रहः"इत्यमरः।

स्मृत्वा अजनिति 'अलंखल्वोः प्रतिषेधयोः क्त्वा वे"ति क्त्वा प्रत्ययः।

शिखरिणी वृत्तम् ॥१४॥

(ड) अरु इति। अतिचिरम् अतिबहुकालं निरुद्धैरभ्यन्तरावद्धैः निश्वासैः निष्ठुरं कठोरं कठोरत्वात् निश्चलमित्यर्थः। निश्वासाभावात् वक्षःस्थलं निस्पन्दमास्त इति निष्कर्षः।

"कठोरं निष्ठुरं दृढ़'मित्यमरः।

(ढ) जनेति। हा प्रियसखि! कीदृशीमवस्थां गतासीति शेषः। सिञ्चति कौशल्या-मिति शेषः।

---

(१) कमण्डलुजलेनेति पाठान्तरम्।

पुनरकाण्डविवर्त्तनदारुणो
विधिरहो विभिनष्टि मनोरुजम् ॥१५॥

कौश। संज्ञां लब्ध्वा। हा वच्छे जाणइ! कहिं सि, सुमरामि दे विआहलच्छीपरिग्गहेक्कमण्डणं पप्फुरन्तसुद्धहसिदमुद्धमुह-पुण्डरीअं, आपप्फुरन्तकोमुदचन्दचन्दिआसुन्दरेहिं अङ्गेहिं

(ग) हा वत्से! जानकि! क्वासि, स्मरामि ते विवाहलक्ष्मीपरिग्रहैक-मण्डनं प्रस्फुरच्छुद्धहसितमुग्धमुखपुण्डरीकम्, आस्फुरत्कौमुदचन्द्रचन्द्रिकासुन्दरै-

सुहृदिति। विधिर्विधाता सुहृत् सखेव प्रथमम् आदौ बाल्यकालावधि रामवनवास-पर्य्यन्तमित्यर्थः, एकः अविमिश्रः दुःखेनासंयुक्त इत्यर्थः रसः सुखास्वादो यस्यां तां धारा-वाहिककेवलसुखशालिनीमित्यर्थः अनुकूलताम् आनुकूल्यं प्रकटय्य प्रकाश्य सुखप्रदः सन् अहो बत पुनः अकाण्डे अनवसरे वार्द्धके तादृशदारुणदुःखासहिष्णुत्वेन अयोग्यकाल इत्यर्थः विवर्त्तनेन परिवर्त्तनेन दारुणो भयङ्करः, रूपान्तरधारणेन नृशंस इत्यर्थः मनो-रुजः चित्तपीडा विभिनष्टि विशेषेण करोति नानाविधदुर्घटनाकरणेन दारुणं दुःख-मुत्पादयतीत्यर्थः।

अत्र सुखप्रदविधेर्दुःखोत्पत्तेर्विषमालङ्कारः सुहृदिवेति श्रौत्या उपमया सङ्कीर्य्यते।

'अहो। विषादः' इति शब्दकल्पद्रुमः।

'काण्डोऽस्त्री दण्डवाणार्ववर्गावसरवारिषु' इत्यमरः।

द्रुतविलम्बितं वृत्तम् 'द्रुतविलम्बितमाह नभौ भरा'विति लक्षणात् ॥१५॥

(घ) कौशेति। संज्ञां चैतन्यम्। विवाहलक्ष्म्याः विवाहकालीनशोभायाः परिग्रहो धारणमेव एकम् अद्वितीयं मण्डनं भूषणं यस्य तत्, कृत्रिमालङ्काराभावेऽपि तात्-कालिकस्वाभाविकशोभयैव अतीवशोभितमित्यर्थः। प्रस्फुरता विकसता शुद्धेन निर्म्मलेन हसितेन स्मितेन मुग्धं मनोहरं मुखं पुण्डरीकं पद्ममिव तत् तथोक्तं स्मरामीत्यनेनान्वयः। आस्फुरन्ती सम्यक्प्रकाशमाना कौमुदस्य कार्त्तिकमासीयस्य

उल्लासेहि; जादे! पुणोवि उज्जोएहि उच्छङ्गं,। सव्वदा महाराओ भणादि, एसा रहुउलमहत्तराणं वहू, अम्हाणं उण जणअसम्बन्धेण दुहिदिआ एव्व। (ण)

कञ्चु। यथाह देवी। (त)

पञ्चप्रसूतेरपि राज्ञ आसीत्
प्रियो विशेषेण सुबाहुशत्रुः।
वधूचतुष्केऽपि यथैव शान्ता
प्रिया तनूजास्य तथैव सीता ॥१६॥

रङ्गं उल्लासय, जाते! पुनरप्युद्द्योतयोत्सङ्गं, सर्वदा महाराजो भणति, एषा रघुकुल-महत्तराणां वधूः, अस्माकं पुनर्जनकसम्बन्धेन दुहिता एव।

चन्द्रस्य चन्द्रिका ज्योत्स्ना तद्वत् सुन्दरैः अङ्गैरवयवैः उल्लासय आनन्दय अस्मानिति शेषः। जाते! कन्यातुल्ये! उत्सङ्गं क्रोडम् उद्द्योतय प्रकाशय उपवेशनेनेत्यर्थः। महाराजो दशरथः, भणति ब्रवीति स्म। किमित्याह एषा सीता रघुकुलस्य महत्तराणां प्राचीनानां अस्मत्पितृपितामहादीनामित्यर्थः वधूः स्नुषा, पुनः किन्तु जनकसम्बन्धेन जनकेन सह मित्रत्वरूपसम्बन्धेन दुहिता एव कन्यैव, जनकस्य यो यादृशः सम्बन्धी अस्माकमपि स तादृशः सम्बन्धी जनकस्य मम च अभिन्नहृदयत्वात्, अतएव जनकस्य या कन्या सा ममापि कन्यैवेति भावः।

अत्र मुखपुण्डरीकमित्यत्र चन्द्रिकासुन्दरैरित्यत्र च लुप्तोपमाऽलङ्कारः। तथा चन्द्रिकेत्यनेनैव अभिप्रेतार्थनिर्वाहे पुनश्चन्द्रपदोपादानात् पुनरुक्ततादोषः, चन्द्रपद-परित्यागेन स समाधेयः।

भणतीति प्रयोगतश्चेति अतीते वर्त्तमाना।

(त) कञ्चुकीति। देवी कौशल्या, यथाह सत्यं ब्रवीति।

अयार्थत्वं स्वयमपि प्रतिपादयति पञ्चेति। सुबाहोः सुबाहुनामकराक्षसस्य शत्रुः हन्तारामः, प्रसूयते उत्पाद्यते या सा प्रसूतिरपत्यं, पञ्च प्रसूतयः अपत्यानि यस्य तस्य

जन। हा प्रियसख! महाराज दशरथ! एवमसि सर्वप्रकारहृदयङ्गमः कथं विस्मर्य्यसे। (थ)

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि।
त्वं कालेन तथाविधोऽप्यपहृतः सम्बन्धबीजन्तु तत्
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग् जीवितम् ॥१७॥

रामादयश्चत्वारः पुत्राः, शान्ता च एका कन्येति पञ्चापत्यशालिन इत्यर्थः राज्ञो दशरथस्य विशेषेण चन्द्रश्च चाधिकेन प्रिय आसीत्। शान्ता तदाख्या तनूजा कन्या यथैव प्रिया, तथ चतुर्ष्वपि स्नुषाचतुष्टयेऽपि मध्ये सीता तथैव प्रिया आसीत्।

अत्र आसीदित्येकक्रियया सुताद्वयस्नुसीतयोरन्वयात् तुल्ययोगिताऽलङ्कार उपजया सङ्कीर्य्यते।

वृत्तम् इन्द्रवज्रयोर्म्मेलनादुपजातिः ॥१६॥

(थ) जनेति। सर्वेण प्रकारेण हृदयङ्गमः हृद्यः प्रीतिभाजनमिति यावत् अतीवप्रीतिभ जनरूपो नम: सर्वदैव मनसि वर्त्तत इति बहुकालात्ययेऽपि विस्मर्त्तुं न शक्यत इति भावः।

कन्याया इति। किलेति लोकवार्त्तायां। कन्यायाः पितरः पितृपक्ष इत्यर्थः जामातुः कन्याभर्त्तुः आप्तं बन्धुत्वेन विश्वस्तं पित्रादिकमित्यर्थः जनं पूजयन्ति दानानुगत्यादिना सम्मानयन्ति, इयमेव साधारणी चिरन्तनी रीतिरिति किलशब्दस्यार्थः। किन्तु सम्बन्धे आवयोरस्मिन् वैवाहिकत्वसम्बन्धे तत् पूजनं विपरीतमेव समाजप्रचलितरीतिविरुद्धमेव अभूत्। तत् वैपरीत्यमेवाह आराधनं ते मयीति। ते तव जामातृपितुः मयि कन्यापितरि आराधनं दानानुगत्यसान्त्ववादादिना सम्माननम् इत्थं च विपरीतमित्यर्थः। त्वं तथाविधोऽपि अशास्त्रीयां तां समाजरीतिमननुरुन्धन् केवलस्वकीयोदार्य्यगुणेन बन्धुजनसम्मानकारकः कालेन समयेन अपहृतः लोकान्तरं प्रापितः

सीता । जादे जाणइ ! किं करेमि, दढवज्जलेव घड़िप्पबन्ध-णिच्चलं ज्जेव हदजीविदं मं मन्दभाइणीं ण परिच्चयइ । (८)

---

(८) जाते जानकि ! किं करोमि, दृढवज्रलेपघटितबन्धनिश्चलमेव हतजीवितं मां मन्दभागिनीं न परित्यजति ।

अपीति निन्दासूचकमव्ययम् । अवाड्मनसपुरुषामहरणं कालस्य नितान्तमनुचितमिति भावः । तथा तत् सीतारूपं सम्बन्धबीजं आवयोर्वैवाहिकसम्बन्धमूलं च कालेनापहृतमित्यन्वयः । अतएव अस्मिन् घोरे अभीष्टार्थप्रकारणत्वात् भयङ्करे जीवलोको नरक इव जीवलोक एव नरको वा तस्मिन् पापस्य पापवतः पापं विना दुःखभोगी न स्यादिति भावः । मम जीवितं जीवितावस्थया अवस्थानं धिक् निन्दामीत्यर्थः । इदानीं मम मरणमेव श्रेय इति भावः ।

अत्रोपमारूपकयोः सन्देहसङ्करालङ्कारः उभयोरपि साधकबाधकप्रमाणाभावात्, काव्यलिङ्गञ्च । तथा पूजयन्तीत्यभिधाय पुनराराधनमित्यभिधानात् प्रक्रमभङ्गः, तथा सम्बन्धबीजमित्यत्र सम्बन्धयथार्थकथकार आवश्यकः किन्तु नोक्त इति वाच्यानभिधानञ्चेति दोषद्वयम्, आराधनमित्यत्र 'सम्पूजनं' सम्बन्धबीजमत्र इत्यत्र च 'सम्बन्धबीजञ्चे"ति पाठेन समाधेयम् ।

"वार्त्ता सम्भाव्ययोः किल" "आप्तः प्रत्ययितस्त्रिषु" । "गर्हासमुच्चयप्रश्नशङ्का-सम्भावनास्वपी"ति चामरः ।

शार्दूलविक्रीडितं वृत्तम् ॥१७॥

(८) कौशीति । जाते । पुत्रि ! । दृढेन दीर्घकालस्थायिना वज्रलेपेन वज्रनिर्मित-लेपेन घटितो विहितो यो बन्धः संयोगः तेन निश्चलं सुस्थिरं गन्तुमसमर्थमित्यर्थः; हतजीवितमेव दुर्भाग्यप्राणा एव कर्तुं मां मन्दभागिनीं न परित्यजति । अहन्तु जीवनं त्यक्तुमिच्छाम्येव सीताभावे जीवनधारणस्य निष्फलत्वादिति भावः ।

अरु। आश्वसिहि राजपुत्रि ! वाष्पविश्रामोऽप्यन्तराले(१) वार्त्तव्य एव, अन्यच्च किं न स्मरसि, यदवोचदृष्यशृङ्गाश्रमे युष्माकं कुलगुरुः, तदुपजातमेव, (२) किन्तु कल्याणोदकं भविष्यति। (ध)

कौश। भअवदि ! अतिक्कन्तो मणोरहो [३]। [न]

अरु। तत् किं मन्यसे राजपुत्रि ! [४] मृषोद्यं तदिति, नहीदं सुक्षत्रिये ! अन्यथा मन्तव्यं, भवितव्यमेव तेन। [प]

(न) भगवति ! अतिक्रान्तो मनोरथः !

(ध) अरु इति। अन्तराले अवसरे मध्ये मध्ये इत्यर्थः, वाष्पविश्रामोऽपि अश्रुविसर्जनविरामोऽपि। केवलमविरतं रोदनं न कर्त्तव्यमित्यर्थः तथात्वे चक्षुर्नाशाद्यनिष्टसम्भावनासत्त्वादिति भावः। अन्यच्च वाष्पविसर्जनविरामकारणमित्यर्थः ब्रवीमीति शेषः। कुलगुरुः वशिष्ठः। उपजातमेव जातप्रायमेव नात्र सन्देह इत्येवशब्दार्थः। कल्याणं मङ्गलम् उदकं उत्तरफलं यस्य तत् कल्याणोदकं भविष्यति एतदवस्थान्तरमिति शेषः। ऋष्यशृङ्गाश्रमे तस्य यज्ञसम्पादनाय गतो भगवान् वशिष्ठः लोकपरम्पराश्रुतसीताविसर्जनव्यापारो श्वश्रूशोकाकुलां कौशल्यामिदमाह स्म 'भद्रे ! समाश्वसिहि, पुत्रपूर्णोत्सङ्गामेव जानकीं पुनर्द्रक्ष्यसि' इति वाक्यस्य सत्यताविश्वासवशादरुन्धत्याः सान्त्ववादोऽयमिति मन्तव्यम्।

'उदर्कः फलमुत्तर'मित्यमरः।

(न) कौशेति। मनोरथः अभिलाषः सीतापुत्रदर्शनाकाङ्क्षेति यावत् अतिक्रान्तः अतीतः चिराय नष्ट इत्यर्थः। नानाश्वापदसङ्कुलारण्ये निर्वासनेन सीताया एव अभावादिति भावः।

(प) अरु इति। तत् तदित्यर्थः तत् कुलगुरोर्वचनं मृषोद्यं मिथ्या वाक्यम्

---

(१) अन्तरे। (२) तत्तथेत्युपजातमेव। (३) कुदो अदिक्कन्दमणोरहाए मह एदं। (४) राजपुत्रि !। इति पाठान्तराणि।

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयो भूत् ।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतां व्याहरन्ति ॥१८॥

नेपथ्ये कलकलः । [फ]

इति किं मन्यसे ? हे सुदक्षिणे । तत् चलितव्य शङ्कासे ! इदं गुरुवचनम् अन्यथा मिथ्याभूतं नहि मन्तव्यं, तेन गुरुवचनेन भवितव्यमेव सत्यं न भाव्यमेव । अवश्यमेव सपुत्रामेव सीतां पुनः द्रक्ष्यसि युष्मत् कुलगुरुसदृशानां त्रिकालज्ञानामृषीणां महासत्यवादित्वादिति भावः ।

मृषा उद्यते मिथ्या उच्यत इति मृषोद्यं 'नाम्नि वदः क्यप् चे'ति क्यप् ।

तेषां महासत्यवादितां प्रतिपादयति आवि रेति । आविर्भूतं प्रकाशितं ज्योतिः ब्रह्माख्यं तेजो येषां तेषां कृतब्रह्मसाक्षात्काराणामित्यर्थः ब्राह्मणानां ये व्याहारा उक्तयः तेषु संशयः वाक्यमिदं सत्यं मिथ्या वेति सन्देहो माभूत् न भवतु तवेति शेषः । हि यस्मात् एषां ब्राह्मणानां वाचि वाक्ये भद्रा कल्याणी निर्दोषेत्यर्थः लक्ष्मीः यथार्थता सम्पत्तिः निषक्ता निश्चलग्ना । अन्यच्च एते ब्राह्मणाः विप्लुतां अर्थविप्लवशालिनीं मिथ्याभूतामिति यावत् वाचं वाक्यं न व्याहरन्ति न वदन्ति ।

अत्र ब्राह्मणानां वाक्ये संशयकर्त्तव्यत्वाभावरूपकार्य्यस्य तदीयसत्यत्वरूपकारणेन समर्थनात् कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ।

'व्याहार उक्तिर्लपितं' । 'सम्पत्तिः श्रीश्च लक्ष्मीश्च' इति चामरः

एतत्तृतीयचरणानुरूपं वाक्यं पाणिनिमहाभाष्येऽपि दृश्यते । यथा—

"भद्रैषां लक्ष्मीर्निहिताधिवाचि ।'

एकादशीतत्त्वधृतं विष्णुवचनञ्च 'ब्राह्मणानां प्रसादेन दिवि तिष्ठन्ति देवताः ।
ब्राह्मणाभिहितं वाक्यं न मिथ्या जायते क्वचित् ।'

शालिनी वृत्तम् ॥१८।

(फ) नेपथ्य इति । नेपथ्ये वेशरचनास्थाने, कलकलः कोलाहलः ।

सर्व्वे आकर्णयन्ति। [ब]

जन। अद्य खलु शिष्टानध्याय इत्युद्धतं खेलतां बटूनां कलकलः। [भ]

कौश। सुलहसोक्खं दाव बालत्तणं होदि। निरूप्य। अम्महे! एदाणं मज्झे को एसो रामभद्दलच्छीपरिसोहिदेहिं सावट्टम्भमुद्धललिदेहिं अङ्गेहिं अह्माणं वि लोअणाइं सीदलावेदि। [म]

(म) सुलभसौख्यं तावत् बालत्वं भवति। अहो! एतेषां मध्ये क एष रामभद्र-लक्ष्मीपरिशोभितैः सावष्टम्भमुग्धललितैरङ्गैः अस्माकमपि लोचनानि शीतलयति।

(ब) सर्वं इति। आकर्णयन्ति उत्कर्णाः सन्त इति शेषः।

(भ) जनेति। कुतस्त्योऽयं कलकल इति कौशल्यादीनामनुमितं संशयं निराकर्तुमाह अद्येति। शिष्टानां वंशपरम्परया वेदाध्यायिनां अनध्यायो अध्ययना-ध्यापनाविरामः, इति हेतोः, उद्धतम् उल्लम्फन-द्रुतधावनादिरूपं यथा स्यात्तथा खेलतां क्रीडां कुर्वतां बटूनां ब्राह्मणकुमाराणाम्। अद्य वशिष्ठादीनामागमनेन अनध्यायो जात इति पाठाभावात् निरुद्वेगोत्फुल्लचित्ता ऋषिकुमाराः कोलाहलं कुर्वन्त उल्लम्फनद्रुत-धावनादिरूपां खेलां कुर्वन्तीत्यर्थः।

जनसमागमादनध्यायमाह मनुः 'अनध्यायो रुद्यमाने समवाये जनस्य च।'

शिष्टमाह वशिष्ठः —'पारम्पर्य्यागतो येषां वेदः सपरिबृंहणः।

तं शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः॥"

(म) कौशेति। बालत्वं शैशवं; सुलभं सांसारिककार्य्यकलापचिन्ताऽभावात् अनायासलभ्यं सौख्यं सुखं यत्र तत्। शैशवसमये हि यतः कुतश्चिदेव कारणात् सुखमुत्पद्यत इति मनः स्फूर्तिमन्त एते अनध्यायसुखमिदं कलकलेन प्रकटयन्तीति भावः। रामभद्रस्य या लक्ष्मीः शरीरशोभा तया तत्सदृशशोभयेत्यर्थं इति निदर्शनाऽलङ्कारः, अवष्टम्भेन सौष्ठवेन सह विद्यमानानि सावष्टम्भानि सुघटितत्वात् अतीवप्रशस्ता

अरु । अपवार्य्य सहर्षोत्कण्ठं स्वगतम् । इदं नाम तत्रभागीरथी-निवेदितरहस्यं कर्णामृतं, नत्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति । (य)

जन । कुवलयदलश्यामस्निग्धः (१) शिखण्डकमण्डनो-
वटुपरिषदं पुण्यश्लोकः श्रियेव सभाजयन् ।

मीत्यर्थः सुग्धानि सुन्दराणि, ललितानि मनोहरविन्यासभङ्गियुक्तानि च तैः अङ्गैः हस्त-पदाद्यवयवैः, अस्माकमपि ससम्पर्काणां का कथा निःसम्पर्काणामप्यस्माकमित्यर्थः । शीतलयति सुखशीतलानि करोति ।

"सौष्ठवं स्यादवष्टम्भ" इति हलायुधः । ललितमाह उज्ज्वलनीलमणिः—

"विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा ।
सुकुमारा भवेद् यत्र ललितं तदुदीरितम् ॥"

(य) अरु इति । अपवार्य्य देहपरिवर्त्तनेन कौशल्यादीनां श्रवणयोग्यताम-दत्त्वेत्यर्थः । तल्लक्षणमाह साहित्यदर्पणे "···तद्भवेदपवारितम् ।
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते ॥"

भागीरथ्या गङ्गया निवेदितं ज्ञापितं रहस्यं गुप्तविवरणं जन्मावस्थित्यादिकं यस्य तत् तथोक्तं, कर्णयोरमृतं पीयूषवदामोदजनकम् इदं तत् वचनं वचनाभिधेयः कुशलवयोः कश्चिदित्यर्थः वाच्यवाचकयोरभेदविवक्षयोपपत्तिः तु किन्तु आयुष्मतोः दीर्घजीविनोः कुशलवयोर्मध्ये अयं कतरः क इत्येवं न विद्मः न जानीमः । भागीरथी-कथितानुरूपाकृतिदर्शनात् कुशलवयोरेकोऽयमिति सामान्यतो निश्चेतुं शक्नोमि, किन्तु कुशोऽयं किम्वा लवोऽयमिति विशिष्य निश्चेतुं न शक्नोमि पूर्व्वमदर्शनादिति भावः । कर्णामृतमिति निरङ्गकेवलरूपकमलङ्कारः ।

कुवलयेति । कुवलयस्य उत्पलस्य दलवत् पत्रवत् श्यामः श्यामलः तथा स्निग्धः मसृणः स तथोक्तः, तथा शिखण्डकः काकपक्षः मण्डनं भूषणं यस्य सः, तथा पुण्या पवित्रा श्लोः शोभा यस्य सः तथा॰ श्रिया देहशोभया वटुपरिषदं ब्राह्मणकुमारवर्गं

---

(१) स्निग्धश्याम इति पाठान्तरम् ।

पुनरिव शिशुर्भूतो (१) वत्सः स मे रघुनन्दनो-
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥१८॥

कञ्चु । नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये (र)

जन । एवमेतत् । (२) तथाहि । (ल)

चूड़ाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोम (३) पवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।

सभाजयन् अलङ्कुर्वन्निव स्थित इति शेषः, पुनः शिशुर्भूतः शैशवमापन्नः स मे वत्सो रघुनन्दनो राम इव कोऽयं बालकः दृष्टः अवलोकितः सन् झटिति द्रुतं दर्शनमात्रेणेत्यर्थः दृशोश्चक्षुषोः अमृताञ्जनं सुधाया अञ्जनं कुरुते अमृतेन चक्षुषी लिम्पतीत्यर्थः ।

अत्र अमृताञ्जनं कुरुत इति भावाभिमानिनी प्रतीयमाना क्रियोत्प्रेक्षाऽलङ्कारः, सभाजयन्निवेति वाच्या, क्रियोत्प्रेक्षा तथा पुनःशिशुर्भूतो रघुनन्दन इवेति वाच्या द्रव्योत्प्रेक्षा, तथा कुवलयदलश्यामस्निग्ध इति लुप्तोपमा च इत्थं तेषां परस्परनिरपेक्षस्थितेः संसृष्टिः । शिखण्डकमण्डन इत्यत्र छेकानुप्रासः ।

"अञ्जनं । मक्षणं" इति शब्दकल्पद्रुमः ।

हरिणी वृत्तम् ॥ १८ ॥

(र) कञ्चु इति । अयं दृश्यमानो दारको बालकः, ब्रह्म चरतीति ब्रह्मचारी नवोपनीतो गुरुकुले निवसन् वेदमधीयान इत्यर्थः । क्षत्रियश्चासौ ब्रह्मचारी चेति सः । नूनं निश्चितं भवेदिति शेषः, इति मनो सम्भावयामि ।

(ल) जनेति । एतत् क्षत्रियब्रह्मचारीति यदुक्तं तदेव सत्यमित्यर्थः । स्वयमपि तत् समर्थयति तथाहीति ।

---

(१) भूत्वा इति पाठभेदः । (२) एवमेव इति भिन्नः पाठः । (३) भस्मस्तोक इति क्वचित् पाठः ।